॥ श्रीजिनाय नमः ॥

# ॥ श्रीनरवर्मचरित्रं ॥

( काव्यबद्धं )

छपावी प्रसिद्ध करनार.

पंडित श्रावक हीरालाल हंसराज. ( जामनगरवाला )

संवत्—१९६६. सने १९०९

किं. रु.—१—०—०

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

☞ जामनगर जैनभ्भास्करोदय छापखानामां छाप्युं.

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥

# ॥ श्रीनरवर्मचरित्रं प्रारभ्यते ॥

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज (जामनगरवाला)

आदित्यादिमहामहःसमुदया यस्यैकदेशं श्रिताः । श्रीकल्पद्रुमकामधेनुमणयो यद्दान-
दास्यं गताः ॥ शुक्लध्यानधुराधृतां कथमपि श्रीयोगिनां गोचरं। श्रीआर्हत्यपदप्रदायिपरम-
ज्योतिस्तदेव स्तुवे ॥ १ ॥ संवेगवेगां नवधा वदंतीं । तत्वानि वाणीं परिपीय यस्य ॥ सुधां
मुधाहुर्विबुधाः स पार्श्वः । श्रीस्तंभनेशः शिवतातिरस्तु ॥ २ ॥ श्रीवर्द्धमानं जिनवर्द्धमानं ।
श्रीगौतमेशं श्रुतदेवतां च ॥ जपस्तुतिध्यानपदे विधाय । सम्यक्त्वसाराः स्वगिरः करोमि ॥
॥ ३ ॥ सुरेषु शक्रो मनुजेषु चक्री । नगेषु मेरुर्द्युतिमत्सु सूरः ॥ तारासु चंद्रो भुजगेषु शेषः ॥ १ ॥
। पयोनिधिः सर्वजलाशयेषु ॥४॥ मणीषु वृक्षेषु गवां गणेषु । चिंतामणिः कल्पतरुर्द्युधेनुः ॥
एते यथा मुख्यपदं व्रजंति । धर्मेषु सम्यक्त्वमिदं तथैव ॥ ५ ॥ व्रतानि दानानि जिनार्चना-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नि । शास्त्राणि तीर्थानि गुणार्जनानि ॥ क्रियाजपध्यानतपांसि सर्वं । सम्यक्त्वसेवासहितं
शिवाय ॥ ६ ॥ श्रीआदिनाथप्रमुखा जिनेंद्राः । श्रीपुंडरीकप्रमुखा मुनींद्राः ॥ सौमंगलेय-
प्रमुखा नरेंद्रा । मुक्तिं गता बोधिभवप्रभावात् ॥ ७ ॥ नारायणश्रेणिकमुख्यभूपाः । श्रीजै-
नधर्मे प्रथितस्वरूपाः ॥ तीर्थंकरत्वं प्रतिपाद्य मुक्तिं । यास्यंति सम्यक्त्वगुणेन सम्यक् ॥८॥
आदाय सम्यक्त्वमिदं गुरूणां । पार्श्वे जना ये प्रतिपालयंति ॥ ते स्वर्गमोक्षाश्रयिणो भवंति
। यथा पुरा श्रीनरवर्मभूपः ॥ ९ ॥ कर्णावलीकुंडलकोपमानं । हृदंतरे हारलतासमानं ॥
अतश्चरित्रं नरवर्मनेतु–र्बुधप्रियं वच्मि सुधामुधाकृत् ॥ १० ॥ सत्पात्रभूमौ शुभदानबीजा–
न्युप्तानि सिक्तानि च भावतोयैः ॥ फलंत्यचिंत्येन फलेन यत्र । तद्भारतं क्षेत्रवरं विभाति ॥
॥११॥ न्यायेन भूपस्य जयो रिपूणां । धर्मेण पापस्य जयो जनानां ॥ यस्यां पुरि सा विज-
याभिधाना । विराजतेऽत्र त्रिदिवोपमाना ॥ १२ ॥ निजप्रजापालनपोषणेन । समस्तजंतुक्ष-
तिरक्षणेन ॥ शरीरभाजां किल धर्मरूप–स्तस्यां विरेजे नरवर्मभूपः ॥ १३ ॥ याऽगण्यलाव-
ण्यवरेण्यरूपा । रंभारतिप्रीतिरमानुरूपा ॥ सच्छीलसारा शुभवंशजाता । सा सुंदरी भूपति-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वल्लभाऽभूत् ॥ १४ ॥ औदार्यधैर्यादिगुणप्रधानः । कलाकलापार्जनसावधानः ॥ न्यायैकधामा
स्फुरितोग्रधामा । पुत्रस्तदीयो हरिदत्तनामा ॥ १५ ॥ स्वबुद्धिशस्त्रप्रहतारिपक्षः । सर्वेषु का-
र्येषु सदैव दक्षः ॥ भूमीशसंसेवनबद्धकक्षः । सखा च मंत्री मतिसागराख्यः ॥ १६ ॥ वज्रीव
चक्रीव हलीव नित्यं । विराजमानो निजराजचिह्नैः ॥ सभां विभावान् सरसीमिव स्वां । स
राजहंसः समलंचकार ॥ १७ ॥ ताराभिरभ्रं त्रिदिवं सुरौघैः । सरः सरोजैर्जलधिस्तरंगैः ॥
वनं रसालैश्च यथा चकास्ति । तथा नरैर्भूरितरैः सभाऽभूत् ॥ १८ ॥ तदा मुदा भूमिपतौ
निविष्टे । न्यायाब्धिराकेंदुनिभे सभायां ॥ सभ्या अवोचन्नृपभाग्यभंग्या । प्रोत्साहिता ध-
र्मकथां मिथोऽत्र ॥ १९ ॥ तत्राहुरेके किल धर्म एष । परोपकारः क्रियतेंगिनां यः ॥ कारु-
ण्यवात्सल्यविधानदान-दाक्षिण्यभेदैर्बहुधा स गम्यः ॥ २० ॥ परे पुनः प्राहुरहो पयोधि-प-
यःप्रवाहा इव विस्तरंतु ॥ धर्मे विचारा विविधा बुधानां । धर्मः परं या कुलमार्गसेवा ॥२१॥
अत्रांतरे प्रोन्मिषितात्मबुद्धिः । स्वछंदवाणीहतधर्मशुद्धिः ॥ प्रत्यक्षवादी वदतिस्म तत्र । चा-
र्वाक उच्चैःकृतनेत्रपत्रः ॥ २२ ॥ जीवो भवाः संयमपुण्यपाप-स्वर्गापवर्गाः सुखदुःखभावौ

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ खपुष्पवत्सर्वमिदं निरास्यं । प्रत्यक्षसाराचरणं रहस्यं ॥ २३ ॥

जजल्पुरन्ये बहुभिः किमाभि–विंकल्पसंकल्पनकल्पनाभिः ॥ शास्त्रेषु धर्मः कथितो हि योऽस्ति । सता स तावत्परिपालनीयः ॥ २४ ॥ अतत्वभाजां वचनानि तेषां । मिथो विरुद्धानि निशम्य धर्मे ॥ संदेहदोलां घनमादधानः । स चिंतयामास नरेश इत्थं ॥ २५ ॥ परोपकारः पुरुषार्थ एष । पापानि न स्युः कुलमार्गधर्मे ॥ विश्वस्य वैचित्र्यत एव नैव । तन्नास्तिकत्वं परलोकलोपि ॥ २६ ॥ लोकेषु शास्त्राणि च यानि संति । परस्परं तानि विरोधभांजि ॥ अतो ह्यमीषां वचनेन सम्यक् । धर्मे न भावी खलु निश्चयो मे ॥ २७ ॥ धर्मश्च विश्वप्रथितप्रभाव । आबालगोपालजनप्रसिद्धः ॥ स सत्यरूपो भुवने जनानां । किं किं विधातुं न यतः समर्थः ॥ २८ ॥ प्राज्यानि राज्यानि सुभोजनानि । सौभाग्यनैरोग्यस्वयोग्यवर्गाः ॥ रामारमारम्ययशोविलासाः । स्वर्गापवर्गौ प्रभवंति धर्मात् ॥ २९ ॥ दारिद्र्यमुद्रापरकर्मकृत्त्व–दुष्टस्वभावाऽसुखसंगतानि ॥ एकत्वरंकत्वकदन्नभोज्य–कुरूपमुख्यानि भवंत्यधर्मात् ॥ ३० ॥ प्रसिद्धमेतत्परमिद्धबुद्धि । गुरुं विना तौ कथमत्र गम्यौ ॥ यत्क्षीरनीरस्य वि-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वेकमेकः। कर्तुं समर्थः खलु राजहंसः ॥ ३१ ॥ प्राचीन पुण्यप्रचयेन लभ्यो। गुरुर्गरीयान्
भवसिंधुपोतः ॥ किं क्वापि चिंतामणिकामधेनु–कल्पद्रुमाः स्युः सहजप्रसन्नाः ॥३२॥ वि-
सर्ज्य सद्ध्यानप्रवर्त्तमानं। श्रीसद्गुरुध्यानधियं दधानं॥ कृतप्रणामो विनयेन भूपं। दौवारिको
विज्ञपयांबभूव ॥ ३३ ॥ गुरुं विनेयाः पितरं तनूजा–भ्रंइं चकोरास्तरणिं रथांगाः ॥ द्रष्टुं य-
थेच्छंति तथा सहर्षो। द्वारि स्थितः कोऽपि नरो नरेशं॥ ३४ ॥

शीघ्रं विमुंचेति निदेशमाप्य। मुक्तस्ततस्तेन स भक्तियुक्तः॥ नत्वा नरेशांघ्रिपयोज-
युग्मे। मरालकेलिं कलयांचकार ॥ ३५ ॥ तं वीक्ष्य दक्षः क्षितिपः सखायं। विज्ञाय हर्षा-
त्सहसोल्लसास ॥ संतो हि मित्रे चिरकालदृष्टे। पाथोजवत्स्मेरमुखश्रियः स्युः॥ ३६ ॥ सा-
नंदसादरसहासविलासपूर्वं। प्रोवाच मित्रममृतौघकिरा गिरा सः॥ कच्चित्सुखं वपुषि ते कु-
शलं कुलीन। दृष्टोऽसि किं मदनदत्त चिरादिदानीं ॥ ३७ ॥ भ्रांत्वाथ केषु विषयेषु सखे स-
खेलं। संवीक्ष्य कानि कुतुकानि समागतोऽसि ॥ इत्थं समग्रपरिपृष्टनिजस्वरूपं। भूपंप्रति
प्रथितभक्तिरुवाच सोऽपि ॥ ३८ ॥ देवाऽवधारय तवांह्रिसुरद्रुसेवा–हेवाकितो मम समस्तमि-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दं समस्ति ॥ श्रेयस्वता सुखभृता भ्रमता मयोर्व्यां । ये वीक्षिताश्च विषयाः शृणु तानशेषा-
न् ॥ ३९ ॥ अंगं बंगकलिंगमागधमहाराष्ट्रान् सौराष्ट्रान् कुरून् । काशीकोशलकीरमालवन-
गान् पंचालजालंधरौ ॥ कच्छं कुंकणवल्लाटमलयश्रीसिंधुसौवीरका–नित्थं देशगणानहं दृष्टशि-
वान् बंभ्रम्य भूमिं चिरं ॥ ४० ॥ दृष्टानि कौतुकशतानि किमेषु वच्मि । हारं गृहाण नृप कौ-
तुकसर्वसारं ॥ आदाय वीक्ष्य च तमामलकप्रमाण–सद्वृत्तमौक्तिकमयं नृपतिर्जहर्ष ॥ ४१ ॥
भो मित्र कुत्र भ्रमता त्वयाप्तो । हारः श्रिया लब्धयशोविहारः ॥ इति प्रणीते प्रणिपातपूर्वं
। स्पष्टं स आचष्ट नरेश्वराय ॥ ४२ ॥ योगेन योगी सुधिया नियोगी । भोगेन भोगी प्रमि-
तिः प्रयोगैः ॥ भूपेन सेना विनयेन सूनु–र्ज्ञानेन देही द्रविणेन गेही ॥ ४३ ॥ ज्ञात्वा श्रि-
योऽपि व्यवसायमूलां । अतस्तदर्थं विहितप्रयत्नः ॥ देव त्वदीयां प्रणतिं विधाय । देशांतरे
संचलितस्ततोऽहं ॥ ४४ ॥ युग्मं ॥ द्विरेफवृंदं मकरंदहेतो–र्वने वने याति यथा जवेन ॥ पु-
रीपुरश्रीनगराकरेषु । तथाहमर्थार्जनवांछयागां ॥ ४५ ॥ अथ व्रजन् पूर्वदिशंप्रतीशं । भीतिप्र-
दश्वापदनादपूर्णां ॥ संसारचक्रे गुरुकर्मजीव । इवाऽटवीं शैपदिकां पपात ॥ ४६ ॥ शुष्को-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्टतालुस्तृषया जलार्थी । भ्रमंन्ननन्नोदयवृष्टिरूपं ॥ अशेषदोषोदयवर्जितांगं । निवारयंतं विषयप्रसंगं ॥ ४७ ॥ प्रक्षालयंतं जनपापपंकं । प्रमादवादे विहितान्निशंकं ॥ विस्तारयंतं सुकृतप्रयोगं । गुणंधराख्यं गुरुमालुलोके ॥ ४८ ॥ युग्मं ॥ मरुस्थलीकल्पतरूपमानं । मोहांधकारौघयन्नेदन्नानुं ॥ संसारवारांनिधियानपात्रं । तं वीक्ष्य जातः प्रमुदैकपात्रं ॥ ४९ ॥ अंतर्लसन्नावन्नरेण तूर्णं । प्रणम्य सूरिं पुरतो निषण्णः ॥ तद्वाणिपीयूषरसेन सिक्त—स्त्यक्तस्तदाहं तृषया क्षुधान्निः ॥ ५० ॥ अत्रांतरे कोऽपि सन्नानिविष्टः । सुरः स्फुरत्स्फारशरीररोचिः ॥ देवांगनादेवगणेन युक्त । आकर्णयन् धर्मकथां व्यलोकि ॥ ५१ ॥ बिन्राणः कटके पदोर्मणिमये कव्यां कटीसूत्रकं । पाणयोः कंकणयुग्ममंगदयुगं बाहुद्वयोर्दीपकं ॥ हारं वक्षसि कंठकंदलगतं ग्रैवेयकं कुंमले । श्रुत्योर्न्नालतले विशेषकमथो शीर्षे मणीशेखरं ॥ ५२ ॥ तं वीक्ष्य पद्माकरवद्दिवाकरं । केकीव मेघं शरदं सितत्नदः ॥ चंडं पयोधिरिव तत्क्षणं मे । मनो मदानंदपदं बन्नूव ॥ ५३ ॥ मां वीक्ष्य देवोऽपि विकाशिहर्ष—प्रकर्षपूरैः परिपूरितांगः ॥ पप्रच्छ सूरिं न्नगवन् क एष । दृष्टश्च हर्षं तनुते कुतो मे ॥ ५४ ॥ श्रीसूरिरूचे त्रिदश त्वदीयो । न्नवांतरे



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यद्भ्रबुबांधवोऽयं ॥ तेनैष दृष्टस्तव हृष्टिदो हि । नेत्राणि जातिस्मरणं भजंति ॥ ५५ ॥ कथं कथं नाथ ममैष बांधव–स्त्वं तदू ड्डुतं मे प्रकटीकुरु प्रभो ॥ ज्ञानांशुपूरे रविवत्तमश्चयं । हं- तुं समर्थो भविनां भवादृशाः ॥ ५६ ॥ इदं स्वरूपं स्वयमेव देव । जानासि स्वीयावधिना तथापि ॥ सभास्थितप्राणिगणप्रमोद–प्रदं शुभंयु शृणु कथ्यमानं ॥ ५७ ॥ इतश्च—

श्रीपद्मप्रभजन्मजातसुखमान्यर्निर्मितस्वःपुरी । श्रीमद्वीरजिनेशपारणरणत्कीर्त्तिश्रिया सुं- दरी ॥ कौशांबीति पुरी सुधर्मजनतावासात्कलेर्जित्वरी । भोगींद्रव्रजसंगतः फणिपतिश्रेयः- पुरीसोदरी ॥ ५८ ॥ गुणालिरत्नावलिवीचिमाली । कुलांबुजोल्लाससमरीचिमाली ॥ अलीकं- नालीकरमाहिमाली । नृपो जयाख्योऽजनि शीलशाली ॥ ५९ ॥ चंडांशुचंद्राविव चारुरो- ची । दृशाविवान्योऽन्यसमस्वभावौ ॥ यशःप्रतापाविव मूर्त्तिमंतौ । द्वौ तस्य राज्ञस्तनयाव- भूतां ॥ ६० ॥ अथेभकर्णाऽस्थिरसर्वभावा–भवस्वभावाच्च तदीयमाता ॥ बाढ्येऽपभावं भज- तिस्म कोवा । दैवस्थितिं चालयितुं समर्थः ॥ ६१ ॥ पित्रातिवात्सल्यवशेन तेन । विज्ञाय सन्न्यायमुखं गुणौघं ॥ निजांगसेवायुवराजरूपे । पदे प्रदत्ते युवयोस्तदानीं ॥६२॥ मातुः सप-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्री निजपुत्रराज्य–कृते विषोन्मिश्रितमोदकानि ॥ निजेन पुंसा नवतोर्वनांतः–कीरुावतोर्दा- पयतिस्म पापा ॥ ६३ ॥ प्रत्यंगमंतार्विषवासनावशा–न्ननाश चैतन्यमतीव दूरतः ॥ किं राहु- णा ग्रस्ततमे दिवाकरे । प्रन्नावनूमिर्न्नवति प्रन्नान्नरः ॥ ६४ ॥

पुत्रस्वरूपं परिवारवाक्याद्–ज्ञात्वा नृपः खेदपदं बजूव ॥ कलापतिं हीनकलं विलोक्य । किं हासन्नावं न्नजते न सिंधुः ॥ ६५ ॥ शिक्षा कुशिष्येषु यथा वृथा स्या–द्वैद्योपचारः स- कलोऽपि तद्वत् ॥ ततो गतासू इव वृक्षमूले । स्थितौ न्नवंतौ पतितौ समूर्छौ ॥ ६६ ॥ त- दा मुदा सेवितसंयमश्रीः । शांतस्वन्नावो न्नवदीयन्नाग्यात् ॥ कंकेलिवृक्षस्य तले निषस्रो । दिवाकरः साधुवरो ददर्श ॥ ६७ ॥ युग्मं ॥ कृपापरीतो गरुडावतारं । सस्मार साराध्ययनं तदेव ॥ परोपकाराय कृतावतारा । यत्ताहशा नैव विलंबन्नाजः ॥ ६ए ॥ नीत्या रमा रूपगु- णेन रामा । रज्ज्वा घटी यद्वदुपैति कृष्टा ॥ प्रत्यक्षतां तेन तथा जगाम । स्फुरन्मरीचिर्ग- रुर्माधिनाथः ॥ ७० ॥ तत्पक्षवातप्रसरप्रन्नावा–द्विषं तदैवोपशमं जगाम ॥ प्रचंममार्त्तंडमयू- खदंमै–र्ध्वस्तं तमस्तिष्ठति किं कदापि ॥ ७१ ॥ मूर्छात्ययाज्जागरितौ स्थितावित्र । स्वं वीक्ष्य



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूमौ पतितं तदा युवां ॥ किं स्वप्नमेतन्नु किमिंद्रजालकं । किं वा भ्रमोऽसाविति संशयं गतौ ॥ ७२ ॥ प्रजल्पता मातृविषस्वरूपं । साधूपकारं गरुडागमं च ॥ पार्श्वस्थपित्रादिपरिच्छेदेन । संबोधितौ स्वस्थतमावभूतां ॥ ७३ ॥ मंत्रेण तंत्रेण नियंत्रणेन । भोगेन योगेन तपश्चयेन ॥ प्रत्यक्षभावं भजते न देवः । परोपकारिन् हि विना भवंतं ॥ ७४ ॥ स्तुत्वेति नम्रौ गरुडो बभाण । भो भो भवंतौ बहुभाग्यवंतौ ॥ शांतेन दांतेन यतीश्वरेण । येनाऽमुनाऽकारि कृपाऽधुना वां ॥ ७५ ॥ मुनिः कृपालुर्भवतोः पुरस्ता—द्यद्यद्वदीति स्थिरभावतस्तत् ॥ कर्त्तव्यमित्थं प्रणिगद्य सद्यः । स्थानं निजं श्रीगरुडाधिपोऽगात् ॥ ७६ ॥ प्राणप्रदानानुपमोपकारिणं । दिक्चक्रसंजातयशोविहारिणं ॥ पंचांगनत्या प्रणिपत्य साधुं । युवां स्तुतिं चक्रतुरादरेण ॥ ७७ ॥ संसारसंतापसुधाप्रचार । विचित्रचारित्रविधूतमार ॥ अनेकधासूत्रितभूविहार । परोपकाराय कृतावतार ॥ ७८ ॥ कारुण्यकेलिकलितांगयष्टे । ज्ञानादिरत्नत्रयजातपुष्टे ॥ सद्ध्यानधाराकृतकर्मसृष्टे । मुनीश जीयाः कृतपुण्यवृष्टे ॥ ७९ ॥ युग्मं ॥

इत्थं स्तुवानौ पदपद्मलग्नौ । वैराग्यभाजा यतिना भवंतौ ॥ पीयूषसारेण गिरां भरेण ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संज्ञाषितौ धर्मनिदेशनेन ॥ ८० ॥ पंचेंद्रियत्वं नरजन्म धर्मः । क्षेत्रं कुलं सद्गुरुरागमेछा ॥
आरोग्यमायुश्चरणं यदेते । सुदुर्लज्ञा ज्ञो ज्ञविनां पदार्थाः ॥ ८१ ॥ सामग्रिकां ये शुज्ञज्ञा-
ग्ययोगा—दवाप्य साफल्यमिमां नयंति ॥ ते धीरवीरा ज्ञवगुप्तिगेहा—न्निष्काशयंति स्वमतो-
वधन्याः ॥ ८२ ॥ शरीरहेतोर्धनमर्ज्यते जनैः । शरीरसौख्याय कलत्रसंग्रहः ॥ शरीरमोहा-
त्स्वपरादिनिर्मिति—स्तदेव नैवात्मवशे खलोपमं ॥ ८३ ॥ प्राग्जन्मकोटीकृतपुण्यज्ञूताः । श-
क्रत्वचक्रित्वमुखप्रज्ञूताः ॥ श्रयंति लक्ष्मीं ननु यावदायुः । क्षणे क्षणे तज्ञलतीह नृणां ॥८४॥
प्रमादज्ञावेन धनांधताद्यै—र्द्वेषादिदोषैः कलुषीकृतेन ॥ येनात्मना हा सुकृतं कृतं न । स के-
न वार्यः कुगतौ यियासुः ॥ ८५ ॥ संसारपाशो नरके निवासः । शिष्टेषु हासः सुकृतस्य ना-
शः ॥ दास्यावकाशः कुयशोविलासो । ज्ञवंति नृणां विषयाज्ञिषंगात् ॥ ८६ ॥ तदा कला-
वान् गुणवान् सुधीमान् । हीमान् यशस्वी सुखमारमावान् ॥ पुण्यप्रज्ञावान् बहुज्ञाग्यज्ञंगि-
मान् । जंतुर्यदि स्यात्सुकृते त्वरावान् ॥ ८७ ॥ पुण्यैकसारं नरजन्म येन । हा हारितं मो-
हवशंगतेन ॥ अजागलस्थस्तननिष्फलेन । तेनाऽपरं किं विहितं नरेश ॥ ८८ ॥ मातुः स-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पत्नी विगताऽपराधयो–र्यद्यावयोर्दुष्टमतिर्विषं ददौ ॥ कौटिल्यपूर्णे भववासवेश्मनि । कः क-
स्य विश्वासमुपैतु धिग्भवं ॥ ७९ ॥ माता पिता मित्रकलत्रपुत्राः । स्वसृस्नुषाबंधुपितृव्यकु-
ल्याः ॥ सर्वे स्वकार्येऽमृतकुंभतुल्या । विना स्वमर्थं खलु जन्मशल्याः ॥ ८० ॥ निष्कारणं
बंधुरयं मुनीश्वरो । नानुग्रहं चेदकरिष्यदावयोः ॥ अज्ञानभाजोर्विषमूर्छनायुजोः । शुभं भ-
वेत् किं कुगतिं प्रपन्नयोः ॥ ८१ ॥ कायेन कर्तुं वचनेन वक्तुं । चित्तेन यच्चिंतयितुं न शक्यं
॥ विधिर्विधत्ते तदपीह सद्यः । संसारचक्रे भ्रमयंश्च जंतून् ॥८२॥ विभाव्य भावेन भवस्वरूपं
। जडं मनो वां चरणग्रहाय ॥ गुरोः स्फुटोन्नतविवेकनेत्रा । भवांधकूपे हि पतंति नैव ॥८३॥

व्रताय ताताऽनुमतिं प्रयच्छ–त्युक्ते युवाभ्यां स पिता बभाण ॥ पुत्री भवद्भ्यां सरला-
शयाभ्यां । ज्ञातं न घोरं चरणं व्रतस्य ॥ ८४ ॥ मोहप्ररोहः प्रसरन्निवार्यः । स क्रोधयोधो
हृदये न धार्यः ॥ मानो न मान्यो मदलोभमाया । दुःशीलजाया इव यत्र हेयाः ॥ ८५ ॥
परीषहा यत्र सदैव सह्या । न चित्तवृत्तिर्विषयेषु योज्या ॥ आजन्म चर्या बहुधा तपस्या ।
न क्वापि कार्या ममतावयस्या ॥ ८६ ॥ दुःपाल्यशीलं परिपालनीयं । वैराग्यरत्नं हृदि ला-

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

लनीयं ॥ भूमीव सर्वसहता विधेया । हास्यादिषट्कोपचितिः प्रहेया ॥ ९७ ॥ महाव्रतोऽमर्त्यनगातिभारो । विश्रामवर्जं शिरसैव धार्यः ॥ निर्क्राशनं भूशयनं नवीन—ध्यानानुसंधानमहो सदैव ॥ ९८ ॥ इत्येवमादिप्रचुरप्रकारा—श्चारित्ररामारमणीयहाराः ॥ शिरीषपुष्पाधिकसौकुमार्य—वद्भ्यां भवद्भ्यां नु कथं प्रपाद्याः ॥ ९९ ॥ स्नेहावलिप्तेन जयाधिपेन । संजल्पितेऽनल्पविकल्पभाजा ॥ युवां नमंतौ भवदावनीरदां । विज्ञप्तिमित्थं जनकाय चक्रतुः ॥ १०० ॥ जातानि यानि नरके परतंत्रभावा—द्दुःखानि तिर्यगुदयेऽपि सुदुस्सहानि ॥ मानुष्यजन्मनि कुदेवगतौ च तानि । सोढानि नाथ कथमत्र भवे भ्रमद्भ्यां ॥ १ ॥ तस्मान्न दुःखैः परितप्यतेंगी । प्रयाति तृप्तिं न सुखैरनंतैः ॥ तत्तात चारित्रवशेन सह्यं । पापापहं दुःखमपि प्रशस्यं ॥२॥ मूर्ध्ना सुमेरुं जलधिं भुजाभ्यां । वह्निं कराभ्यां गगनं पदाभ्यां ॥ आक्रम्यते साहसिभिस्ततो न । दुःखप्रदं नौ भविता चरित्रं ॥३॥ इत्थं बहूक्त्या पितरं प्रबोध्य । दीनेषु हीनेषु जनेषु दानं ॥ दत्वा भृशं साधुदिवाकरस्य । पार्श्वे प्रपेदे चरणं युवाभ्यां ॥ ४ ॥ दंभेन मानेन मदेन राग—रंगेण लोभेन विवर्जितांगौ । निरंतरं श्रीसमयावगाह—परौ प्रकृष्टौ व्रतिनावभूतां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ५ ॥ युवां यदर्थं चरणं प्रपन्नौ । तमर्थमाराध्य विशुद्धबुद्ध्या ॥ प्रांते च सम्यक् कृतका-
लधर्मौ । सौधर्मकल्पे त्रिदशावभूतां ॥६॥ त्वं विद्युदभ्रगतसुंदरनामकोऽभू—र्विद्युत्प्रभोऽयमभ-
वत्परमेष पूर्वं ॥ च्युत्वा ततो विजयवत्यभिधानपुर्यां । श्रेष्ठ्यंगजो मदनदत्त इति प्रजज्ञे ॥७॥
ऽव्यार्थमूर्व्यां भ्रमता ह्यनेन । दृष्टः सदर्षं त्वमिहागतेन ॥ ऐक्षि त्वयाप्येष इदं च देव । प्रा-
ग्जन्मभूतं भवतोः स्वरूपं ॥ ८ ॥ श्रुत्वेति देवोऽवधिनावगम्य । स्वकंठहारं शुचिकांतिसारं
॥ भवांतरप्रीतिभरेण मूर्त—मिव प्रसादं प्रददौ स मेऽमुं ॥ ९ ॥ बभाण भूयस्त्रिदशो मुनी-
शं । निद्राऽरतिस्वस्तरुकंपनाद्यैः ॥ चिह्नैः स्वकीयं च्यवनस्य कालं । प्रभो समीपागतमेव
जाने ॥ १० ॥

ममावतारः क्व च बोधिबीजं । कथं भविष्यत्यथ सूरिराह ॥ क्षेत्रेऽत्र भावी नरवर्म-
भूमी—भुजोंगजस्त्वं हरिदत्तनामा ॥ ११ ॥ अमुष्य हारस्य विलोकनेन । सम्यक्त्वलाभो भ-
विता तवाशु ॥ श्रुत्वेति सूरिं प्रणिपत्य देवः । प्रदर्शितो धाम निजं जगाम ॥ १२ ॥ गतेऽथ
देवे प्रणिपातपूर्व—ममुष्य हारस्य मया च पृष्टः ॥ उत्पत्तिहेतुं तत आदरेण । प्रत्याह सूरिः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शृणु भावसार ॥ १३ ॥ पृथ्वीपुरंध्र्या मुकुटोपमानो । महीधरो विंध्य इति प्रसिद्धः ॥ तले
तदीये शतधा समृद्धं । पुरं शतद्वारमुदारमस्ति ॥ १४ ॥ हंसालिवन्निर्मलपक्षयुग्मो । वटद्रु-
॥ १५ ॥ वद्विस्तृतभूरिशाखः ॥ विनेतवत्तत्र स भूतिभाजी । श्रेष्ठी विशिष्टोऽजनि पूरणाख्यः ॥१५॥
श्रियं समग्रां प्रभूतां समस्तां । प्राचीनपुण्यप्रभवां विभाव्य ॥ अतस्तदर्जाविधये विधिज्ञः
। स तापसानां व्रजतिस्म दीक्षां ॥१६॥ नैकानि तीव्राणि तपांसि कृत्वा । पर्यंतकालेऽनश-
नं विधाय ॥ मृत्वाऽथ जज्ञे चमराद्यचंचा—सद्राजधान्यां चमरेंद्र एषः ॥ १७ ॥ तत्रावतीर्णः
स नवस्तदानीं । गवेषयन्नूर्ध्वभुवं ददर्श ॥ शक्रं सुधर्मासदआसनस्थं । स्वमस्तकस्योपरि
वर्त्तमानं ॥ १८ ॥ प्रनृत्यमानैः परितः सुपात्रै—र्गंधर्वगीतैश्चलचामरौघैः ॥ सामानिकश्रेणिनि-
जांगरक्ष—मुख्यैरनेकैस्त्रिदशैः परीतं ॥ १९ ॥ युग्मं ॥

तत्कालसंजातकरालकोप—ज्वालावलीशुष्कविवेकवृक्षः ॥ जगाद देवान्निजकानमात्य— ॥ १५ ॥
कल्पाननल्पान् धृतमानसानुः ॥ २० ॥ किमेष भो तिष्ठति मे शिरःस्थो । जानाति किं नो
निजपौरुषं सः ॥ किं वास्य नेष्टं निजजीवितव्यं । न वेत्ति मां किं चमरेंद्ररूपं ॥ २१ ॥ इ-

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

त्थं प्रजल्पन् परिवारभूतै-स्तन्मंत्रिकल्पैस्त्रिदशैरभाणि ॥ स्वभावसृष्टो किमिति प्रभो ते ।
कोपोऽतिमानं परनिंदनं हि ॥ २२ ॥ नेष्टार्थमाप्नोत्यविमृष्टकार्ये । जंतुः प्रसक्तो विपदां पदं
स्यात् ॥ कृत्वा निवृत्तिं परिपालय स्वां । साम्राज्यलक्ष्मीं चमराधिनाथ ॥ २३ ॥ इत्थं तदु-
क्तया हविषा कृशानु-रिवैष जज्वाल महातरस्वी ॥ रेरेऽधमास्तेन सुराधिपेन । किं लंचि-
ता यूयमपि प्रकामं ॥ २४ ॥ अत्यंतजीर्णद्रुमवत्क्षणेन । तन्मानसर्वंकष एष गत्वा ॥ तं पात-
यित्वा द्रुतमागतोऽह-मीक्षध्वमीक्षध्वमिह स्थिरता नु ॥ २५ ॥ सोत्साहवाक्यं परिजल्प्य गे-
हे-नद्दींव सर्वं तृणवद्विजानन् ॥ निवार्यमाणः स्वपरिच्छदेन । सगर्वचेताश्चमरश्चचाल ॥ २६ ॥
कोपेन कंप्रारुणकाययष्टि-रेकालसंध्यां प्रथयन् पृथिव्यां ॥ एकावलीहारममुं निधाय । कंठे-
ऽतिकुंठश्चमरश्चचाल ॥ २७ ॥ आदाय पाणौ परिघं महांत-मुल्लालयन्नंतकवत्करालः ॥ अमं-
गलैर्दुःशकुनैर्निवार्य-माणोऽपि मोहाच्चमरश्चचाल ॥ २८ ॥ रिपोर्जये व्याधिहतौ सुधर्म-का-
र्ये न कार्यो विदुषा विलंबः ॥ इतीव मानी विजिगीषुरेष । प्रोत्तालवेगश्चमरश्चचाल ॥ २९ ॥
कार्ये स्वसिद्धिं विषमामपेक्ष्य । जयोऽजयो वा यदि कर्हिचित्स्यात् ॥ तदा शरण्यो मम को-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऽत्र भावी–त्यचिंतयच्छ्रीचमराधिनाथः ॥ ३० ॥ स सूसुमारे नगरे ददर्श । ज्ञानेन वीरं प्रति-
माप्रपन्नं ॥ गत्वा प्रणम्य प्रभुमाह नाथ । भूया ममालंबनमिष्टसिद्ध्यै ॥ ३१ ॥ इत्थं परित्रा-
णपदं विधाय । श्रीवीरनाथं गगनांगणेऽथ ॥ घोरांधकाराकृति योजनानां । निर्माय लक्षं व-
पुरुत्पपात ॥ ३२ ॥ हुंकारनादैर्जगतीं प्रकंपयन् । स्वगर्जनोत्तर्जितकिन्नरासुरः ॥ ब्रह्मांडभांडं
परितो विभावयन् । संत्रस्तदेवं पुरमाप वज्रिणः ॥ ३३ ॥ पद्मानवद्यार्णववेदिकायां । तस्यां
विधाय क्रममेकमुच्चैः ॥ कृत्वा द्वितीयं हरिसंसदंत–श्चुक्रोश शक्रं बहुधा कुवाक्यैः ॥ ३४ ॥
सहासमिंद्रोऽवधिना विभाव्य । समागतं तं चमरेंद्रमत्र ॥ सस्मार लक्षार्कनिभं स्ववज्रं ।
मुमोच तस्योपरि तूर्णमेव ॥ ३५ ॥ सहस्रधारं कुलिशं विलोक्य । प्रकंपमानो भयविह्वलां-
गः ॥ अत्याकुलोऽधोमुख ऊर्ध्वपादः । पलायनं सत्वरमेव चक्रे ॥ ३६ ॥ एकावलीहारममुं
न कंठ–भ्रंशेन नश्यन् पतितं विवेद ॥ शरीरसंक्षेपमतीव कुर्वन् । कुंथूपमो वीरपदांतरेऽ-
स्थात् ॥ ३७ ॥ श्रीवीरनिश्वासमुपागतं तदा । विज्ञाय शक्रो विषसाद चेतसि ॥ साधर्मिको
हा मयका विराधित–स्ततोऽस्य पृष्ठौ सहसा चचाल सः ॥ ३८ ॥ आदाय वज्रं स्वकरे वि-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मौजा । आश्वास्य तं निर्भयमाशु चक्रे ॥ स निर्गतो वीरजिनं प्रणम्य । निर्निंद शक्रस्य पु-
रः स्वमार्गः ॥ ३९ ॥ त्रिलोकनाथस्य पुरस्तदानीं । विश्वत्रयीविस्मयदानदक्षं ॥ रक्षाक्षमं
प्रेक्षणकं विधाय । तीर्थे स चक्रे चमरोपपातं ॥ ४० ॥ परस्परं प्रीतिभरावनम्रा–वानंदवंतौ
चमरेंद्रशक्रौ ॥ प्रणम्य भक्त्या जिनवर्द्धमानं । यथागतं जग्मतुरुत्तमौ तौ ॥ ४१ ॥

इतश्च विद्युत्प्रभनिर्जरेण । केलिप्रियेण भ्रमता पृथिव्यां ॥ द्वीपे त्वसंख्याततमेऽत्र हा-
रो । दृष्टो गृहीतस्तव दत्त एषः ॥ ४२ ॥ इत्थं नराधीश निशम्य सूरितो । हारस्वरूपं प्रणि-
पत्य तं गुरुं ॥ भ्रांत्वा समानां भुवि पंचविंशति–मुपार्जितार्थस्तव पार्श्वमागमं ॥ ४३ ॥ स
एव देवस्तव पुत्रभावं । जातोऽथवा कोऽप्यपरो नरेश ॥ ज्ञातव्यमेतद्भवता न जातु । स्याद-
न्यथा सद्गुरुभाषितं हि ॥ ४४ ॥ निमंत्र्य भूपो हरिदत्तपुत्रं । क्षणांतरं संसदि वार्त्तयित्वा ॥
तमेव हारं प्रददौ सुसारं । सम्यक्त्वलाभाय कृतावतारं ॥ ४५ ॥ विलोक्य हारं स कुमार ई-
हा–पोहेन जातिस्मरणं प्रपन्नः ॥ ददर्श दीक्षाग्रहदेवभाव–हारप्रदानादिनिजस्वरूपं ॥ ४६ ॥
संपन्निवासं सुरलोकवासं । देवांगनानां विविधं विलासं ॥ संस्मृत्य संस्मृत्य तदेकतानो । मू-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गमितुद्यां प्रययौ कुमारः ॥ ४८ ॥ शीतोपचारोदितचेतनं तं । पप्रच्छ पुत्रं नरवर्मभूपः ॥ दे
स्वच्छ वत्स कुणतोऽधुना ते । बभूव किं धन्य गुणाढ्य विज्ञ ॥ ४९ ॥ मनोहरं हारममुं निरी-

क्ष्य । संजातजातिस्मरणेन तात ॥ दृष्टं मया पूर्वभवस्वरूपं । विचित्ररूपं भवनाटकस्य ॥
॥ ५० ॥ विज्ञप्तमादौ मदनाद्यवर्ण–दत्तेन मित्रेण यथैव तत्र ॥ तथैव पूर्वाचरितं समस्तं । ज-
गाद पुत्रोऽपि नरेश्वराय ॥ ५१ ॥ भूपः समाकर्ण्य सकर्णमुख्यो । जातिस्मृतिं तस्य तनूभव-
स्य ॥ श्रीजैनधर्मे विदितप्रभावे । भावेन चेतः सुदृढीचकार ॥ ५२ ॥

इत्थं प्रमोदैः परिपूरितांगो । भूमीपतिस्तिष्ठति यावदेषः ॥ तावत्समागत्य कृतप्रणामो ।
दौवारिको विज्ञपयांबभूव ॥ ५३ ॥ युष्मत्पदानां कुसुमावतंसका–भिधानउद्यानवनस्य पा-
लकः ॥ दृष्टुं समीहां कुरुते ततो नृपः । प्रोवाच शीघ्रं तमिहानयानय ॥ ५४ ॥ नरेश्वरादे-
शकृतप्रवेशः । स ढौकयित्वा बकुलस्य मालां ॥ नत्वा नृपं प्राह गुणंधराख्यः । सूरिस्तवो- 
द्यानवने समागात् ॥ ५५ ॥ आकर्ण्य कर्णामृतपारणं त–द्ददौ नृपः स्वाभरणानि तस्मै ॥
वाक्योपकारांश्चयभोजनाध्व–संसूचके स्यात् किमदेयमेव ॥ ५६ ॥ विवेकविद्यागुणवृद्धिहेतौ

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

। प्रीतो गुरौ स्याद्विनयी विनेयः ॥ यथैव तद्वन्नृपतिर्मुनीश–पदोर्नमस्यारसिकोऽतिजज्ञे ॥
॥ ५७ ॥ अत्रांतरे नूपसखाप्यवादीत् । स एव राजन् मुनिपुंगवोऽयं ॥ दारप्रदानप्रमुखस्व-
रूप–निरूपको यो मयका तवोचे ॥ ५८ ॥ कल्पद्रुचिंतामणिकामधेनु–स्वःकुंभवद्दुर्लभ एष
सूरिः ॥ अभंगुरं भाग्यमहो त्वदीयं । स्वयं यदत्राद्य समागतोऽसौ ॥ ५९ ॥ श्रुत्वेति जात-
द्विगुणप्रमोदो । नूपः सुताद्यैः परितः परीतः ॥ सर्वर्द्धिसारः पटुपट्टहस्ति–कृतावतारो विधृ-
तातपत्रः ॥ ६० ॥ प्रोच्चैश्चलच्चामरयुग्मचारुः । शक्रस्य शोभाभरमाततानः ॥ तूर्यांगसंगीत-
कभूरिभेरि–भांकाररावैर्नृपतिः प्रतस्थे ॥ ६१ ॥ युग्मं ॥ संप्राप्त उद्यानवनेऽवनीश–श्चिह्ना-
नि संत्यज्य गजादिकानि ॥ अवग्रहैः पंचविधैर्विधन्यः । पंचांगनत्या प्रणनाम सूरिं ॥ ६२ ॥
कलत्रमित्रांगजमंत्रिमुख्य–परिच्छदस्यास्य नरेश्वरस्य ॥ कल्याणवल्लीजलदागमाप्तं । श्रीध-
र्मलाभं गुरवो वितेनुः ॥ ६३ ॥ दोषप्लुषे पुण्यपुषे गुणौघ–जुषे कृताशेषरुषे समंतात् ॥ स-
मार्चिषे दर्पकदर्पकक्षे । समत्वभाजे खलु दुःखसौख्ये ॥ ६४ ॥ प्रशांतचित्ताय भवाब्धितीर–गताय ताताय जगज्जनानां ॥ मोहांधकारोत्करभास्कराय । नमोनमः सूरिवराय तुभ्यं ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ६५ ॥ युग्मं ॥ स्तुत्वेति भूपे पुरतो निषसे । संसारकारागृहमोक्षरूपं ॥ विस्तारिताशेषजगत्स्वरूपं । धर्मोपदेशं दिशतिस्म सूरिः ॥ ६६ ॥ मोहप्ररोहप्रचुरांबुपूर्णे । प्रद्वेषरागस्फुरितोर्मिवेले ॥ भूरिभ्रमावर्त्तकुतीर्थसार्थे । विचित्रचिंतासफरीविवर्त्ते ॥ ६७ ॥ अष्टोत्तरव्याधिशताद्युक्ते । जन्मांतकल्लोलचलस्वभावे ॥ अशेषकर्मोदयनक्रचक्र–पाठीनपीठस्फुरितातिघोरे ॥ ६८ ॥ परस्परद्रोहझषावलीढे । कषायमालावडवानलोग्रे ॥ परार्थवांछद्विषयादिचौर–संभारसंचारविरुद्धमार्गे ॥ ६९ ॥ अपारसंसारमहासमुद्रे । शरीरभाजां भ्रमतां नितांतं । सुदुर्लभं मानुषमत्र जन्म । तरंडवत्तारणकारणं यत् ॥ ७० ॥ कलापकं ॥ अनंतसंसारगतांगभाजां । तैश्चुल्लकाद्यैर्दशभिः प्रकारैः ॥ दृष्टांतभूतैरिह मानुषत्वं । वदंति सद्ज्ञानधरा दुरापं ॥ ७१ ॥ तथाहि–तानेव दृष्टांतानाह—

स्वोयर्द्धिविस्मापितविश्वलोकं । कांपील्यनाम्ना नगरं पुराऽभूत् ॥ तत्राऽभवद्ब्रह्मनृपस्तदीयं । श्रीब्रह्मदत्तोऽजनि पुत्ररत्नं ॥ ७२ ॥ संन्यस्य राज्यश्रियमात्मपुत्रे । चतुर्षु मित्रेष्वतिवल्लभेषु ॥ निर्वाहशिक्षां सकलां प्रदाय । ब्रह्मावनीशः परलोकमाप ॥ ७३ ॥ कर्मस्थितेरिं-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

डियचापलत्वात् । कंदर्पदीप्ता चुलनीति नाम्ना ॥ दुराशया तज्जननी स्वकांत-मित्रेण दीर्घेण बभूव लुब्धा ॥ ७४ ॥ श्रीब्रह्मदत्तो धनुमंत्रिवाक्याद्-ज्ञात्वा चरित्रं च तयोश्चकार ॥ शिक्षाकृतेऽनेकविधान् प्रपंचान् । मानी कथं तत्सहते स्वगेहे ॥ ७४ ॥ दीर्घः स नीचश्चुलनीमुवाच । जीवन्नसौ भोगविनाशहेतुः ॥ श्रुत्वाथ सा सूनुविनाशमिच्छु-र्गेहं प्रचक्रे जतुनः स्वयं द्रा ॥ ७५ ॥ तद्गेहमध्ये तनयं नवोढं । स्वापाय पापादिशतिस्म दुष्टा ॥ वह्निं ददौ तत्र ततः सुरंगा-छिद्रेण निर्गत्य ययौ कुमारः ॥ ७६ ॥ शशी प्रसूते ज्वलनं तमांसि । दिवाकरः क्ष्वेडति सा सुधापि ॥ माता मृतिं कांक्षति चेत्सुतानां । तदा कथं प्राणिति जीवलोकः ॥ ७७ ॥ एवं विज्ञाव्य स्फुरितोग्रधाम-धामा कुलामात्यतनूजयुक्तः ॥ देशांतरं स श्रयतिस्म मातुः । स्थातुं क ईष्टे हृदि वाऽतिदुष्टे ॥ ७८ ॥ एकाकिनोऽस्य व्रजतो द्वितीयः । साहायिकः कार्पटिको बभूव ॥ महाटवीं योजनद्वादशांतां । स तेन सार्द्धं प्रविवेश तूर्णं ॥७९॥ भोज्यक्षणे कार्पटिकः स्वभोज्यं । स्वयं चखादास्य ददौ न किंचित् ॥ न सांप्रतं दत्तमनेन भोज्यं । मह्यं तु संध्यासमये प्रदाता ॥ ८० ॥ जातेऽथ संध्यासमये द्विजोऽसौ । नैवं ददौ किंचिदपि स्वभो-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्यात् ॥ एवं व्यतीयाय दिनत्रयं हा । द्विजन्मनां धिक् कृपणस्वभावं ॥ ८१ ॥ साहाय्यतो वाऽस्य महाटवीय–मुल्लंघितेत्याह कुमार एनं ॥ आकर्ण्य राज्यं मम भो त्वमेया । अहो म-हौदार्यमिहोत्तमानां ॥ ८२ ॥ बंभ्रम्य भूमीवलयं महोजा । निर्माय सैन्यं चतुरंगमेषः ॥ पुरं समागत्य निजं च जज्ञे । श्रीब्रह्मदत्तोंतिमचक्रवर्त्ती ॥ ८३ ॥

श्रुत्वा ततः कार्पटिको दधाव । निर्लज्जता ही धनलोभभाजां ॥ राज्ञस्तदा द्वादशवर्ष-राज्या–भिषेकतः प्राप न दर्शनं सः ॥ ८४ ॥ निर्माय वंशे स उपानहां च । ध्वजं स्थितो राजपथे नृपेण ॥ दृष्ट्वा समाकारित आत्मपार्श्वे । संभाषितः स्नेहगिरोपलक्ष्य ॥ ८५ ॥ उ-क्त्वा स्वरूपं निजमाह सोऽथ । नाथ प्रतिज्ञां परिपालयस्व ॥ इति प्रणीते नृपतिर्न्यगादीत् । भो प्रार्थयस्वेष्टवरं द्विजन्मन् ॥ ८६ ॥ पूर्वं निजे सद्मनि भूप भोजनं । दीनारमेकं च ततः प्रयच्छ मे ॥ एतत्समग्रे भरतेऽपि दापय । ममत्वभावं परिकल्प्य भूपते ॥ ८७ ॥ भुक्ते सम-ग्रेषु गृहेषु राज–न्नहं पुनः सद्मनि तावकीने ॥ भोक्ष्ये क्रमान्नाथ तथादिश त्वं । सर्वे हि लोके भवतु ममैवं ॥ ८८ ॥ राज्यादिकं मार्गय तुच्छमेतत् । किं मार्गितं कार्पटिक त्वयात्र ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विन्नो समाकर्णय मामकीनो—दरे नृते संनृतमेव सर्वं ॥ ८९ ॥ तं नोजयित्वा निजनोज-
नेन । दीनारमेकं प्रददौ नरेंद्रः ॥ एतत्पुनर्दापयतिस्म तस्मै । राजांगनामंत्रिमुखस्ववर्गात्
॥ ९० ॥ स नोजनं सर्वगृहेषु कुर्वन् । तथाविधं स्वादमवाप्तुकामः ॥ पुनः पुनश्चिंतयतिस्म
चक्रि–गेहे कदा वारक एष्यतीति ॥ ९१ ॥ यद्वत्तस्य सुदुर्लनः पुनरपि श्रीचक्रिणो वारक–
स्तद्वन्नाशितसारमानुषनवो जीवो नवे पर्यटन् ॥ नानायोनिविडंबनाविनटितस्तां दुःखनूमिं
गतो । दुःस्थेनेव निधिं हहा न लनते नूयो नवं मानुषं ॥ ९२ ॥ चुल्लकशब्देन देशीनाष-
या नोजनमुच्यते, इति चुल्लकदृष्टांतः ॥ अथ पाशकदृष्टांतः—

शक्तिं त्रिधां बुद्धिविधिं चतुर्धा । द्वासप्ततिरम्यकला विजानन् ॥ प्रपंचचातुर्यविचारवि-
ज्ञ–श्चाणिक्यनामा द्विजपुत्र आसीत् ॥ ९३ ॥ देशं वशीकृत्य समृद्धबुद्ध्या । श्रीपाटलीपु-
त्रनृपं च नंदं ॥ नङ्गाप्य संस्थापयतिस्म राज्ये । श्रीचंद्रगुप्तं सचिवाग्रणीः सः ॥९४॥ धूर्ते ध-
र्त्ततरः कलाकुशलिषु प्रेंखत्कलाचार्यको । धर्मध्यानपरेषु धार्मिकतमो निस्त्रिंशके निर्घृणः ॥
विज्ञे विज्ञतमः शमी च शमिषु ठकेषु दक्षावधि–श्चाणिक्यः सचिवः श्रियं प्रतिदिनं निर्वा-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ २५ ॥ हयामासिवान् ॥ ९५ ॥ अथान्यदा कोशमवेक्ष्य रिक्तं । दंभप्रपंचाश्रितचित्तवृत्तिः ॥ स्था-
लं सुरत्नैः परिपूर्य पौरा–नुवाच वाचा चतुरः स मंत्री ॥ ९६ ॥ यो मां विजेता स इदं सम-
ग्रं । गृह्णातु नो वा विजये यदाहं ॥ दीनारमेकं हि ततो गृहीष्ये । श्रुत्वेति लोभांधधियो ज-
हर्षुः ॥ ९७ ॥ आरेभिरे तेन समं जनौघाः । क्रीडां परं देवतया वितीर्णाः । ते पासका अ-
न्यजनस्य हारिं । कुर्वंति चाणिक्यजयं ददानाः ॥ ९८ ॥ दिव्याश्चेत्पासकास्ते क्वचिदपि स-
मये वैपरीत्यं व्रजेयु–र्भूयो जीवैः प्रमादाकृतमनुजभवैः कर्मभिः प्रेर्यमाणैः ॥ भोगाभोगा-
भियोगैर्गतसुकृतधनैर्नैव लभ्यं भवेऽस्मिन् । वारंवारं भ्रमद्भिः सुजिनवरवृषाध्यासितं मानु-
षत्वं ॥ ९९ ॥ अथ धान्यदृष्टांतः—

एकत्र कृत्वा भरतोद्भवानि । धान्यानि सर्वाणि च सर्षपाणां ॥ निक्षिप्यते प्रस्थकं एक
एषु । पर्यंतसिंधाविव सक्तुमुष्टिः ॥ १०० ॥ आहूय वृद्धा शतवर्षदेश्या । दत्वा करे सूर्पक- ॥ २५ ॥
मुच्यते सा ॥ संशोध्य शीघ्रं कणराशितोऽस्मा–त्तान् सर्षपांस्त्वं विरलीकुरुष्व ॥ १ ॥ सा
वृद्धा कणराशितो विधिवशात्तत्सर्षपप्रस्थकं । निष्कास्याथ पृथक्करोति तदपि प्राणी नृ-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जन्मच्युतो ॥ यातः सूक्ष्मनिगोदयोनिषु महामोहांधकारावृतः । श्रीजैनेंद्रवृषान्वितं न लन्न- ते तन्मानुषत्वं पुनः ॥ २ ॥ अथ द्यूतदृष्टांतः—

अष्टोत्तरस्तंन्नशता सन्नान्नूत् । कस्यापि राज्ञस्तनयोऽन्यदाऽस्य ॥ वृद्धतरश्चिंतयतिस्म राज्यं । गृह्णामि वृद्धं जनकं निहत्य ॥ ३ ॥ कुमारचिंतां सचिवः स्वबुद्ध्या । विज्ञायराज्ञः पुरतो जगाद ॥ स्थानेऽर्प्यते मंत्रिषु राज्यमुद्रा । नृपैर्यतोऽमी नयनानि तेषां ॥ ४ ॥ निमंत्र्य नृपः सुतमादिदेश । हे वत्स रीतिं शृणु मे कुलस्य ॥ यो राजसू राज्यमनाः सन्नां स । जयेदिमां तस्य ततोऽस्ति राज्यं ॥ ५ ॥ इयं सन्ना तात कथं हि जेया । पुत्रेण पृष्टे नृपतिर्बन्नाण ॥ अष्टाधिकं स्तंन्नशतं समस्ति । यतः सन्नायां स्फटिकाश्मजातं ॥ ६ ॥ अष्टाधिकं कोणशतं च तेषु । प्रत्येकमेतत्परिधिक्रमेण ॥ अष्टोत्तरं ते शतमत्र वारा—नेकैकशो द्यूतवशेन जेयाः ॥ ७ ॥ इत्थं क्रमेणैककक्रूणकस्य । हारिर्यदि स्याज्जयतोंतराले ॥ तदा पुनर्मूलत एव जेया । इति प्रणीते स तथा च लग्नः ॥ ८ ॥ लोन्नाग्रातमतिस्ततः स तनयो जेतुं प्रवृत्तः सन्नां । दैवात्सोऽपि कदा घुणाक्षरवशात्प्राप्नोति राज्यं पुनः ॥ जीवोऽयं न्नववारिधौ



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निपतितस्तत्रामितां घोलनां । नानाकष्टकरां गतस्तदपि नो भूयो नृतामश्नुते ॥ ए ॥ अथ रत्नदृष्टांतः—

श्रेष्ठी पुराऽभूद्धननामधेयो । नैकानि रत्नानि महार्घभांजि ॥ आसन् गृहे तस्य परं स तेषां । मोहात्सदा विक्रयमीहते न ॥ १० ॥ देशांतरे सोऽगमदन्यदाथ । रत्नानि निष्कास्य तदीयपुत्राः ॥ सर्वाणि वैदेशिकवाणिजानां । समर्पयामासुरनल्पमूल्यैः ॥ ११ ॥ ततो गृहे पर्वदिने प्रचक्रु—रूर्ध्वं ध्वजांस्ते धनकोटिमानाः ॥ यद्वाऽचलायाः श्रिय एतदेव । फलं जनैः कीर्त्तिरवाप्यते यत् ॥ १२ ॥ धनः स्वगेहे समये समेतो । रत्नानि स्वीयानि न पश्यतिस्म ॥ ततः स पप्रच्छ सुतान् समस्तान् । तेऽप्यूचुरस्मै सकलं स्वरूपं ॥ १३ ॥ कोपारुणांगस्तत एष ऊचे । रेरे कुपुत्रा रचितं किमेतत् ॥ रे यात यातालमलं भवद्भी—रत्नैर्विना नागमनीयमत्र ॥ १४ ॥ रत्नालोकपरास्ततः प्रतिदिशं सर्वेऽथ तस्यांगजा । जग्मुस्तेऽपि कदापि दैववशतस्तान्याप्नुवंति चिरं ॥ रत्नानि नरजन्म मोहवशतो हा हारितं हेलया । नासाद्येत पुनश्चतुर्गतिमहो जीवैर्भ्रमद्भिर्भृशं ॥ १५ ॥ अथ स्वप्नदृष्टांतः—



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धूर्त्तेषु धूर्त्तः सरलो हितेषु । मुग्धेषु मुग्धश्चतुरेषु दक्षः ॥ निजैर्गुणैश्चित्रितविश्वलोकः ।
श्रीमूलदेवोऽजनि राजपुत्रः ॥ १६ ॥ भूमीं भ्रमन् पादबलेन वृत्तिं । कुर्वन् मठे कार्पटिकेन
सार्द्धं ॥ सुष्वाप चंद्रं वदने विशंतं । स्वप्ने ददर्शैष समं च तेन ॥ १७ ॥ अथोत्थितः कार्पटि-
कः प्रभाते । स्वप्नं जगौ कार्पटिकव्रजानां ॥ तेऽप्याहुरस्मै शशिसंनिकाशं । लब्धासि भो
रोट्टकमेकमत्र ॥ १८ ॥ मध्याह्नकाले स गतोऽथ भिक्षां । ससर्पिषं रोट्टकमेकमाप ॥ चखा-
द तुष्टोऽजनि खंडतो वा । संतुष्यति श्वा न तु केसरीशः ॥ १९ ॥ श्रीमूलदेवः श्रुतिशास्त्र-
विज्ञो-पाध्यायपार्श्वे फलदानपूर्वं ॥ स्वप्नं भणित्वा फलमापप्रच्छ । स प्राह राज्यं भविताऽ-
चिरात्ते ॥ २० ॥ आनंद्य तद्वाक्यमथो पुरांत-र्भिक्षाप्तकुल्माषकणैर्गुणाढ्यः ॥ मासोपवासा-
दितपःकृशस्य । सोऽकारयत्पारणकं सुसाधोः ॥ २१ ॥ सद्भावतः कारितपारणस्य । श्रीमूल-
देवस्य नभोंगणस्था ॥ देवांगना कापि बभाण हृष्टा । भो भोगयुक्तं हि वरं वृणीष्व ॥ २२ ॥
प्रोच्चैर्जगौ तांप्रति मूलदेवः । सहस्रहस्तींद्रविराजमानं ॥ प्रयच्छ राज्यं गणिकां गुणाढ्यां । तां
देवदत्तां मम देहि देवि ॥ २३ ॥ भविष्यतीदं ध्रुवमेव सर्वं । प्रोच्येति याता निजमास्पदं सा

॥ २० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ययौ दिने सप्तमके स मूल-देवोऽस्तकंपां नगरीं च चंपां ॥ २४ ॥ तस्यामपुत्रे नृपतौ वि-
नष्टे । सर्वां पुरीं भ्राम्यति पंचदिव्ये ॥ न कोऽपि जज्ञे नृपपट्टयोग्य-स्ततस्तदागादनुमूलदेवं
॥१ए॥ ॥ २५ ॥ राज्याभिषेकं कृतवांस्तदास्य । जयध्वनिः खे भुवि विस्तृतश्च ॥ श्रीमूलदेवोऽजनि
भूमिपालः । किमन्यथा दैवतगीर्भवेन्नु ॥ २६ ॥ जातं दिनैः सप्तभिरस्य राज्यं । स्वप्ने समा-
नेऽपि सहस्रनागं ॥ श्रुत्वा ततः कार्पटिको विषण्णो । हा स्वप्नरत्नं चणकैरहारि ॥ २७ ॥
क्रारम्भं बहुवार्तिकं कवलयन् भोज्यं जमो भिक्षुक-स्तत्स्वप्नाय पुनः पुना रचयते स्वापं त-
ले शीतले ॥ इत्थं खेदगतः कदापि लभते स स्वप्नमेतत्परं । भ्रष्टो मर्त्यभवात्पुनर्न लभते
जीवो भवं मानुषं ॥ २८ ॥ अथ राधावेधदृष्टांतः—

पूर्वमिंद्रपुरे जज्ञे । राजा दत्तो दयान्वितः ॥ पोषणात्पालनाज्जातः । प्रजानां जनकोप-
मः ॥ १ ॥ जज्ञुर्द्वाविंशतिस्तस्य । श्रीमालीप्रमुखाः सुताः ॥ कैलासप्रतिबिंबेन । रुचा द्वि- ॥ १ए ॥
गुणिता इव ॥ २ ॥ कल्पद्रुमस्य शाखाव-ज्जज्ञिरेऽनेकशः प्रियाः ॥ एकाऽस्य मंत्रिसूः पत्नी
। पाणिग्रहदिनेक्षिता ॥ ३ ॥ अथान्यदा ऋतुस्नातां । गवाक्षस्थां पितुर्गृहे ॥ राजपाटीं व्रज-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

न् राजा । तामपश्यत् शचीश्रियं ॥ ४ ॥ पप्रच्छ पुरुषं केयं । सोऽवक् देव तव प्रिया ॥ ततो
रात्रिं तया सार्द्ध–मवसन्नृपपुंगवः ॥ ५ ॥ तस्याः कुक्षौ भाग्ययोगा–त्पुण्यपात्रमवातरत् ॥
कोऽपि गर्भतया जीवः । शुक्तौ मौक्तिकवत्तदा ॥ ६ ॥ तदा नृपोक्तसंकेतान् । प्रसादांश्च दि-
नं च तत् ॥ आपृच्छय सचिवः पुत्रीं । पत्रे मंत्रमिवालिखत् ॥ ७ ॥ पुत्रं सुरेंद्रदत्ताख्यं । पूर्वा-
शेव दिवाकरं ॥ प्राप्ते काले प्रसूता सा । स्वजनप्रमदप्रदं ॥ ८ ॥ पर्वताग्निकबहुल–सागरा-
स्तद्दिनेऽपरे ॥ जज्ञिरे गृहदासीभ्यो । दिग्भ्यस्तारा इवांगजाः ॥ ९ ॥ तैर्डिभरूपकैः सार्धं ।
क्रीडां कुर्वन् निरंतरं ॥ रेजे सुरेंद्रदत्तोऽसौ । जयंत इव सुंदरः ॥ १० ॥ कलार्थमन्यदा मंत्री
। कलाचार्याय तं ददौ ॥ अन्ये राजसुतास्तत्र । न्यस्ताः संति पुरैव हि ॥ ११ ॥ ते सौख्य-
लालिता मत्ता । महादुर्ललिताः सदा ॥ न कुर्वंति कलाभ्यासं । स्वेच्छाचारविहारिणः ॥१२॥
किंचिद्वदंतमाचार्यं । संमुखं ताडयंत्यमी ॥ न सहंते वचोमात्रं । ही दुर्जेया मदा यतः ॥
॥१३॥ गृहे गत्वा जगदुस्ते । मातृभ्यो निजताडनं ॥ चुक्रुशुस्ता अपि भृशं । कलाचार्यं रुषा-
कुलाः ॥ १४ ॥ उपेक्षते कलाचार्य–स्तानुन्मादवशंवदान् ॥ छुरिका कांचनस्यापि । क्षिप्यते



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किं निजोदरे ॥१५॥ कलाचार्यं जगौ मंत्री । तथा ताड्यः स्वपुत्रवत् ॥ यथा जानात्ययं मंक्षु ।
स्वनामसदृशाः कलाः ॥ १६ ॥ स विनीतः कलाभ्यासं । प्रचक्रे गुरुताम्रितः ॥ जायते हि
कलावृद्ध्यै । विनयो मुख्यकारणं ॥ १७ ॥ अनध्याया इवैतस्य । डिंभकाः स्खलनां व्यधुः ॥
स च प्रमादं खलव-न्मुंचन् शिक्षारतोऽभवत् ॥ १८ ॥ अनुक्रमेण ताः सर्वा । राधावेधादि-
काः कलाः ॥ शिक्षयित्वा कलाचार्य । आर्पयत् सचिवाय तं ॥ १९ ॥

अथ श्रीमथुरापुर्यां । जितशत्रुनृपोऽजनि ॥ सदा यस्य यशोहंसो । रमते मानसे स-
तां ॥ २० ॥ तनया निर्वृतिनाम्नी । लावण्यैकनिकेतनं ॥ भूपतेस्तस्य भातिस्म । लक्ष्मीरि-
व पयःपतेः ॥ २१ ॥ संजातयौवनोदग्रा । सा संस्नाप्य विभुष्य च ॥ जनन्या मुमुचे भूप-
पार्श्वे निधिरिव श्रियां ॥ २२ ॥ राजोचे वरयोग्यां तां । वत्से स्वच्छे वरं वृणु ॥ राधावेधक-
लागेहं । भूयात्तात वरो मम ॥ २३ ॥ भूरिसैन्यकलामात्य-युक्तां तां नृपतिस्ततः॥ प्रैषीदिं-
द्रपुरे दत्त-पुत्रै रम्यकलैः कले ॥ २४ ॥ असौ मदीयपुत्राणा-मागतास्ति स्वयंवरा ॥ प्रवे-
शोत्सवमेतस्या । दत्तो हर्षादिति व्यधात् ॥ २५ ॥ मंत्रिणो भूपतिं प्रोचु-र्विविधांस्तनयां-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्तव ॥ श्रुत्वा कलोज्ज्वलानेषा–ऽागतास्ति गुणरागिणी ॥ २६ ॥ ततस्ते तनयो योऽस्या । राधावेधादिकां कलां ॥ दर्शयिष्यति तस्यैषा । हर्षेणोद्वाहमिच्छति ॥ २७ ॥ कारयित्वा पुरे शोभां । नृपो निजसुतैर्वृतः ॥ रचितस्फारशृंगारः । सपौरो निर्ययौ बहिः ॥ २८ ॥ मंरूपं कारयित्वाथ । चक्रे स्तंभः समुच्छ्रितः ॥ वामप्रदक्षिणावर्त्त–भ्राम्यच्चक्राष्टकान्वितः ॥ २९ ॥ अधोमुखी स्तंभमूर्ध्नि । स्थापिता यंत्रपुत्रिका ॥ अभिधां राधेति यस्या । आहुः शास्त्रविदो नराः ॥ ३० ॥ अधस्तैलभृते कुंडे । न्यस्तनेत्रेण धन्विना ॥ बाणमूर्ध्वमुखं मुक्त्वा । सा वेध्या वामचक्षुषि ॥ ३१ ॥

तत्रागात्कृतशृंगारा । पाणौ कृत्वा वरस्रजं ॥ सा बाला स्वीयरूपेण । प्रत्यक्षेव सुरांगना ॥ ३२ ॥ आद्यं श्रीमालिनं पुत्र–माकार्याह क्षितीश्वरः ॥ विध्ध्वा राधामिमां कन्यां । सार्द्धं राज्यश्रियोद्वह ॥ ३३ ॥ सोऽथ जातसभाक्षोभ–कंपमानकरद्वयः ॥ नाऽशक्नोऽनुरादातुं । का वार्त्ता बाणकर्षणे ॥ ३४ ॥ यथातथा समुद्धाय । बाणमाकृष्य पाणिना ॥ यत्र वा तत्र वा यात्वि–त्युक्त्वा सोऽथ मुमोच तं ॥ ३५ ॥ गत्वा चक्रांतं तद्बाणो । भग्नाग्रो न्यपत-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भुवि ॥ अजाग्रती कला यद्वा । विडंबयति कं न हि ॥ ३६ ॥ अथ श्याममुखो नृपो । द्वितीयं सुतमादिशत् ॥ तत्राऽशक्तः सोऽपि जज्ञे । लोकानां हास्यभाजनं ॥३७॥ अन्नव्याः प्राणिनो ग्रंथि–भेदं कुर्वंति नो यथा ॥ तथैव तेषु नैकोऽपि । राधावेधं व्यधात्क्रमात् ॥ ३८ ॥ ततश्चिंताचितोदग्ध–चैतन्यो नृपतिस्तदा ॥ चिंतयामास हा चित्ते । कथं पुत्रैर्विडंबितः ॥३९॥ वरं कुलं विना पुत्रै–र्न जातैरपि निष्कलैः ॥ अवृक्षकं वनं रम्यं । न पुनर्विषवृक्षकं ॥ ४० ॥ शुष्कार्कपत्रनिःश्रीक–वदनं धरणीधवं ॥ मंत्री स्माह प्रभो चिंता । क्रियते किं भवादृशैः ॥ ॥ ४१ ॥ एकः पुत्रस्तवाद्यापि । विद्यते मम सद्मनि ॥ पूर्वसंकेतमाख्याय । राज्ञः संस्मारितो हृदि ॥ ४२ ॥ शीघ्रमाकारितस्तत्र । तां सभां प्रविशन्मुदा ॥ निजाकृतेर्विलासेन । लोकांस्तोषयतिस्म सः ॥ ४३ ॥ सर्वराजनकादिष्टो । राधावेधस्य कर्मणि ॥ स सिंह इव निःक्षोभो । गत्वा स्तंभतले स्थितः ॥ ४४ ॥ बध्ध्वा परिकरं सम्यक् । बाणमाकृष्य निश्चलः ॥ अधोमुखस्तैलपात्रे । चक्रभ्रमणमैक्षत ॥ ४५ ॥ श्रीमालिपर्वताद्यास्ते । पार्श्वस्थाः स्खलनां व्यधुः ॥ नदस्तांसिः कलाचार्यः । पुरोऽस्थात्तर्जनापरः ॥ ४६ ॥ राधाया वेधमकरो–दयं गु-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णिकामिव ॥ अथवा दुष्करं किं स्यात् । सदभ्यस्तकलावतां ॥ ४७ ॥ कन्या सा वरमालिकां पुलकिता कंठे न्यधाद्धर्षतः । पुष्पाणां विदधुः सुरा जयजयारावं जना निर्ममुः ॥ राजा मंत्रिवरस्तथा परिकरो जज्ञे महानंदभू–र्विद्या कस्य न विस्मयाय भुवने हृज्जागरूका भवेत् ॥ ४॥ ॥ वर्ण्यः कृतार्थः ससुतः सराज्यो । जज्ञे त्वयाहं तनयोत्तमाद्य ॥ स्तुत्वेति राजार्पितराज्यभारः । सुरेंद्रदत्तोऽजनि सौख्यभागी ॥ ४९ ॥ राधावेधमतीवदुष्करममुं कृत्वापि केचिन्नरा । जायंते सुखभाजनं परमहो मानुष्यजन्मोज्झितः ॥ जीवो दुर्ललितः सदा निपतितः संसारचक्रभ्रमे । नृत्वं नो लभते सुनिर्वृतिसुखश्लेषावहं हा पुनः ॥ ५० ॥ इति राधावेधदृष्टांतः ॥

अस्ति ह्रदो योजनलक्षमान–स्तोयानि यस्य स्थगितानि संति ॥ सेवालजालैर्जटिलैर्भवस्थ–प्राणीव कर्मप्रकरैर्दुरंतैः ॥ ५१ ॥ अनेकशो मत्स्यकुलानि तत्र । संत्यन्यदा वायुवशेन जज्ञे ॥ सेवालभेदाद्विवरं च तेन । मत्स्याग्रणीः कोऽपि नभो ददर्श ॥ ५२ ॥ राकेंदुकांत्या विमलं विहायो । विलोक्य हर्षाद्धुतारतारं ॥ अदृष्टपूर्वं निजमत्स्यवर्गं । वीक्षार्थमामंत्र-

॥ ३४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यितुं जगाम ॥ ६० ॥ हस्तीव यूथेन वृतः स मत्स्यै-र्भ्राम पश्यन् विवरं समंतात् ॥ वा-
तेन भूयो मिलितं तदेवं । विलोकमानोऽपि परं न लेभे ॥ ६१ ॥ तादृक्शैवालजालैर्विरल-
 विरलैरावृते चर्मकल्पै-र्भ्रामं भ्रामं ह्रदेऽस्मिन् भ्रमरहितमना एष मत्स्यस्तदेव ॥ वीक्षांचक्रे
कदाचिद्विवरमिह परं नाभुते कर्मजालै-र्व्याप्तः संसारचक्रे गतमनुजजनिर्मानुषो मानुषत्वं
॥ ६२ ॥ इति चर्मदृष्टांतः ॥

शतभारमयो लोह-गोलकः शक्तितो दिवः ॥ देवेन मुक्त आयाति । मासैः षड्भिर्यदेव हि
॥ ६३ ॥ रज्जोः प्रमाणमेकस्य । तदेव कथितं जिनैः ॥ चतुर्दशभिरेताभि-र्लोकमानं प्रकीर्त्ति-
तं ॥ ६४ ॥ एकरज्जुप्रमाणेन । विद्यते भूमिमंडलं ॥ द्विगुणा द्विगुणा मानैः । संत्यस्मिन्
द्वीपसागराः ॥ ६५ ॥ गतेषु तेष्वसंख्येषु । स्वयंभूरमणोंतिमः ॥ एकरज्जुप्रमाणेन । विद्यते
सागरो महान् ॥ ६६ ॥ प्राच्यां मुक्तं युगं तस्मिन् । पश्चिमायां तु संबिला ॥ दुर्घटो हि मि- 
थो मेलः । कल्लोलाहतयोस्तयोः ॥ ६७ ॥ असंख्याते गते काले । द्वयोर्मेलोऽपि दैवतः ॥ यु-
गछिद्रे संबिलायाः । प्रवेशो दुष्करो यथा ॥ ६८ ॥ तथा कर्मोर्मिभिर्बाढं । प्रेर्यमाणस्य देहि-

नः ॥ अपारे भवपाथोधौ । दुर्लभं मानुषं जनुः ॥ ६९ ॥ इति युगदृष्टांतः ॥ अथ परमाणुदृष्टांतः ॥—



एतंभं सुरः कोऽपि महांतमेकं । खंडानि कृत्वा च विचूर्ण्य तूर्णं ॥ ततः स चूर्णं परमाणुरूपं । चिक्षेप सर्वं नलिकांतराले ॥ ७० ॥ शीघ्रं स गत्वा सुरशैलचूलां । ददौ महाफूत्कृतिमेकवारं ॥ ययुस्ततो वातवशेन नुन्ना । दिशो दिशं ते परमाणवो द्राक् ॥ ७१ ॥ देवो वा दानवो वा पुनरपि परमाणूनमून् मेलयित्वा । एतंभं तैरेव कुर्यादपि विधिवशतः काकतालीयनीतेः ॥ मानुष्याद्भ्रष्ट एष प्रबलबलमहामोहराजस्य वश्यः । सद्धर्मं मानुषत्वं परमिह लभते नैव जीवो भवेऽस्मिन् ॥ ७२ ॥ दृष्टांतमालाभिरमूभिराप्य । सन्मानुषत्वं जिनधर्मयुक्तं ॥ निमेषमात्रोऽपि विवेकविज्ञै—र्धर्मप्रमादो न कदापि कार्यः ॥ ७३ ॥ मानुष्यजन्मन्यनि भूपता या । रसालसालोपरि मंजरी सा ॥ तत्रापि यो रम्यविवेकपोषो । निस्सीमभाग्यविसरः स जंतोः ॥ ७४ ॥ इदं समग्रं नृप धर्मसेवना—भवत्यभूभाव्यमलं शरीरिणां ॥ धर्मः स सम्यक्त्ववशेन जायते । तद् ज्ञातयोर्देवगुरुस्वरूपयोः ॥ ७५ ॥ तथाहि—



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यो वर्जितः पंचभिरंतरायै-र्हास्येन रत्याऽरतिभीतिशोकैः ॥ मिथ्यात्वकामाऽविरतिप्र-
मीला-द्वेषैर्जुगुप्साजडतातिरागैः ॥ ७६ ॥ अमीभिरष्टादशभिर्विमुक्तो । दोषैस्तमःपुष्टिकृते
प्रदोषैः ॥ तथा चतुस्त्रिंशदुदारसार-विस्तारिशोभातिशयैर्भिगम्यः ॥७७॥ समस्तजीवे करुणा-
शरीरः । संप्राप्तसंसारपयोधितीरः ॥ देवाधिदेवः कृतशक्रसेवः । सर्वार्थविज्ञासी शिवसद्मवासी
॥ ७८ ॥ श्रीवीतरागो भुवि भाति योऽत्र । स एव देवो न परे सदोषाः ॥ नित्यं मनःकायव-
चःप्रपंचै-र्ध्येयः प्रणम्यः स्तवनीय एषः ॥ ७९ ॥ दिने निशायां पथि कानने गृहे । स्वापे
सुखे दुःखभरेऽप्यनारतं ॥ यो वीतरागं हृदयान्न मुंचति । तं मुक्तिरामोद्वहनाय वांछति ॥
॥ ८० ॥ सकामाः सरामाः समानाः समोहाः । सदंभाः सलोभाः सकोपाः सपापाः ॥ य-
दि स्युश्च देवास्तदा को विशेषो । नरैः सार्द्धमेषां समानत्वभाजां ॥ ८१ ॥ अन्यत्र देवे वि-
गतस्वरूपा । श्रीवीतरागे कृततत्वरूपा ॥ विनिश्चितार्थो हृदि देवबुद्धि-र्या जायते सा सुकृ-
तस्य गर्भा ॥ ८२ ॥ अथ गुरुः—

षड्भेदयुक्तं व्रतमाचरंतः । षड्जीवकायान् परिपालयंतः ॥ अकल्प्यमाहारमनाहरंतो ।

नैवाददाना गृहिञाजनानि ॥ ७३ ॥ पर्यंकमासंदिकमुज्जहाना । गेहे निषद्यां च न संदधा-
नाः ॥ आजन्मतः स्नानमनाचरंतः । स्वदेहशोञां परिवर्जयंतः ॥ ७४ ॥ अत्युग्ररूपं यतिपा-
लनीय–माचारमष्टादशधा दधानाः ॥ त्रिगुप्तिगुप्ताः समितीश्च पंच । प्रपंचयंतश्चतुर्रावधानाः
॥ ७५ ॥ नवापि तत्वानि विचारयंतः । सिद्धांतसिंधुं हृदि धारयंतः ॥ उत्सर्गमार्गेऽप्यपवाद-
मार्गे । विचारवंतो विगतप्रमादाः ॥ ७६ ॥ कुर्वंत उच्चैर्द्विविधं तपोऽपि । सर्वक्रियायां बहुधा
विधिज्ञाः ॥ हृषीकाणिकायैरपि संवहंतः । स्वाध्यायपीयूषरसं पिबंतः ॥ ७७ ॥ परोपकारप्रव-
णाः स्वसत्त्वा–ऽनुरूपयत्नायतमानचित्ताः ॥ समस्तविध्वस्तकुकर्मयोगाः । साधुक्रियासु प्रब-
लोपयोगाः ॥ ७८ ॥ ममत्वमायामदमानलोञ–क्रोधादिञावारिगणं जयंतः ॥ संत्यक्तसंगा
अतिशांतदांताः । सद्धर्मकर्माचरणेन कांताः ॥ ७९ ॥ प्रबोधयंतो ञविकांबुजानि । सच्चक्रहर्षं
परिपोषयंतः ॥ मोहांधकारप्रसरं हरंतो । मदःस्वरूपा भुवि ञानुरूपाः ॥ ८० ॥ चंद्रोपमा-
नाः कृतसच्चकोर–प्रमोदपूरा वरतारकेशाः ॥ मेरूपमा निश्चलचित्तवृत्त्या । निराश्रयत्वादनि-
लोपमानाः ॥ ८१ ॥ अधृष्यञावेन मृगारिकल्पाः । शौंडीर्यचर्याञिरत्रस्तञावाः ॥ गंञीर-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भावेन पयोधितुल्याः । सर्वसहत्वेन वसुंधराभाः ॥ ९२ ॥ शिष्यप्रशिष्यावलिदत्तशिक्षा । द-
क्षेषु मुख्याः कृतजीवरक्षाः ॥ चारित्रसंसाधनबद्धकक्षाः । सदर्पमोहोरगरंगतार्क्ष्याः ॥ ९३ ॥
अकिंचनाः कांचनलोष्टतुल्याः । समस्तलोकोद्धृतपापशल्याः ॥ एवंविधाः श्रीनरवर्मराजन् ।
सदागमज्ञा गुरवो भवंति ॥ ९४ ॥ अनादिसंसारपयोधिमध्ये । पोतायमानेषु मुनीश्वरेषु ॥
भक्तस्वरूपेषु गुरुत्वबुद्धि–र्यस्यास्ति सम्यक्त्वगुणोऽपि तस्य ॥ ९५ ॥ एभिर्गुणौघैः परिवर्जि-
ता ये । प्रद्वेषपोषाय सखीभवंतः ॥ सारंभलोकव्यवहाररंगा । रामारमारागवशीकृतांगाः ॥
॥ ९६ ॥ कुसंगलीलाहतसत्यशीलाः । कुग्राहमूलाः प्रमदानुकूलाः ॥ अत्यंतमोहाः कुगति-
प्ररोहा । विज्ञेन ते दूरत एव हेयाः ॥ ९७ ॥ स्वलिंगिनो वा परलिंगिनो वा । सुमार्गबाह्याः
कुगुरुस्वरूपाः ॥ स्वयं प्रमादोज्झिततत्त्वरूपाः । कूपा इव त्याज्यपदे विधेयाः ॥ ९८ ॥ तीर्थंक-
रेभ्यो गतरागमोह–द्वेषोदयेभ्यः सदयाशयेभ्यः ॥ एकांतनित्योपकृतौ स्थितेभ्यो । यो जात आ-
दौ त्रिपदीप्रदानात् ॥ ९९ ॥ गणधरैर्लब्धिधरैः सुधीरैः । संसूत्रितो यः सुविचित्रसूत्रः ॥ अने-
कस्वर्थप्रचयेन पूर्णो । मुक्ताकरंडश्रियमाततानः ॥ १०० ॥ दृष्टांतयुक्तिस्थितिहेतुयुक्त । आ-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्यंतमध्ये व्यभिचारमुक्तः ॥ अनेकधाभूतनयप्रपंच—चातुर्यचारीकृतविश्वविश्वः ॥ १ ॥ रत्नप्रदीपः शीवमार्गगानां । दिवाकराभो भविकांबुजानां ॥ सुधोपमानो विबुधव्रजानां । पोतो भवाब्धौ पततां जनानां ॥ २ ॥ सिद्धांत एषः कृतकर्मजालो । वसत्यवश्यं हृदयांतराले ॥ यस्य प्रसन्नीकृतमानसस्य । स एव धन्यः सुकृती कृती च ॥ ३ ॥ अदेवदेवौ कुगुरुं गुरुं वा । कुधर्मधर्मावहितं हितं वा ॥ गुणागुणौ वा बहुपापपुण्ये । न वेत्ति जंतुः समयेन हीनः ॥४॥ जिनप्रणीते शुभधर्ममार्गे । विश्वत्रयीद्योतिपदार्थसार्थे ॥ जीवादितत्त्वे च तथेति बुद्धिः । संजायते भव्यजनस्य भाग्यात् ॥ ५ ॥ देवे गुरौ श्रीसमये नरेश । शंकादिदोषाऽकलुषीकृतस्य ॥ संपद्यते या प्रतिपत्तिरुच्चैः । सम्यक्त्वमेतत्प्रवदंति विज्ञाः ॥ ६ ॥ त्रैलोक्यपद्मोदयकारकेऽस्मिन् । सम्यक्त्वतत्त्वे सति ये पदार्थाः ॥ पाढ्याः प्रदेया अथ लिंगभूताः । संक्षेपतस्तान् कथयामि राजन् ॥ ७ ॥

छव्विहजयणा ६ चउ सद्दहंण ४ उ तिलिंगं ३ दसविणय,१० तिसुद्धि ३ पंचगयं दोसं ५ अट्ठपभावण ८ भूसण ५ लक्खणपंचविहसंजुत्तं ५ छप्पावणभावियं च ६ छट्ठाणं इय सत्तस-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्ठिलरकणन्नेयविसुद्धं च सम्मत्तं ॥ जीवादितत्वेषु सुसंस्तवो यः। सेवा सुदृष्टिव्रतिनां न संगः ॥ नत्सूत्रन्नाजां च कुदर्शनानां। श्रद्धा चतुर्धा परिपालनीया ॥ ८ ॥ अर्हत्प्रणीतगमन्नंगनयानुयोग–सुश्रूषणं प्रतिदिनं जिनधर्मरागः ॥ श्रीमज्जिनेषु जिनधर्मरतेषु वैया–वृत्यं त्रिधेति मुनयः प्रवदंति लिंगं ॥ ए ॥ पंचप्रकारे परमेष्ठिवर्गे। धर्मे श्रुते शासनचैत्ययोश्च ॥ सद्दर्शने यो विनयः स विज्ञै–र्विज्ञेयमित्थं दशधापि सम्यक् ॥ १० ॥ देवो जिनो जिनमतं जिनमार्गरक्ताः। संसारसारमिति शुद्धिरिह त्रिधेयं ॥ शंकादिदोषनिवहो ननु पंचन्नेदः। सम्यक्त्वदूषणकरः परितोऽपि हेयः ॥ ११ ॥ वादी कविर्धर्मकथस्तपस्वी। नैमित्तिकः प्रावचनी सुसिद्धः ॥ विद्याधरोऽष्टौ प्रतिन्नाप्रन्नावात्। प्रन्नावकाः श्रीजिनशासने स्युः ॥ १२ ॥ कौशल्यमुच्चैर्जिनशासनेऽस्मिन्। प्रन्नावनातीर्थनिषेवनानि ॥ न्नक्तिस्थिरत्वं सुगुणाश्च पंच। सम्यक्त्वमेते परिन्नूषयंति ॥ १३ ॥ स्युः पंच राजन्निह लक्षणानि। निरंतरायोपशमः समंतात् ॥ संवेगरंगः करुणान्निषंगो। निर्वेद आस्तिक्यमतिस्तथा या ॥ १४ ॥

कुतीर्थिकानां च कुदेवतानां। कुतीर्थिकैराश्रितजैनमूर्त्तेः ॥ संन्नाषणाऽऽहारसुगंधिदान



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

—स्तुतिप्रणामालपनं न कार्यं ॥ १५ ॥ राजाभियोगोऽथ गणाभियोगो । बलाभियोगश्च सुराभियोगः ॥ कांतारवृत्तिर्गुरुनिग्रहो वा । आकारषट्कं जिनशासनेऽदः ॥ १६ ॥ अस्तीति नित्यः कुरुते कृतानि । भुंक्तेऽस्ति निर्वाणमथास्ति मोक्षः ॥ स्थानानि सम्यक्त्ववताममूनि । श्रद्धानगम्यानि भवंति षोढा ॥ १७ ॥ मूलं द्वारं प्रतिष्ठान—माधारो भाजनं निधिः ॥ सम्यक्त्वं सर्वधर्मस्य । षोढा तद्भावना भवेत् ॥ १८ ॥ व्याख्या—देइ लहु मुरकफलं । दंसणमूले दढंमि धम्मडुमे ॥ मुत्तुं दंसणदारं । न पवेसो धम्मनयरंमि ॥ १९ ॥ नंदइ वयसाहान । दंसणपीढंमि सुपइठ्ठंमि ॥ मूलुत्तरगुणरयणाणं । दंसणं अरकयनिहाणं ॥ २० ॥ सम्मत्तमहाधरणी । आहारो चरणजीवलोयस्स ॥ सुयसीलमणुन्नरसो । दंसणवरभायणे धरइ ॥२१॥ इति सम्यक्त्वसप्तषष्टिभेदाः ॥

सम्यक्त्वमित्थं नृप सप्तषष्टि—भेदैर्विशुद्धं प्रतिपालनीयं ॥ स्थानानि मिथ्यात्वमयानि यानि । भवंति भूयः प्रवदामि तानि ॥ १८ ॥ स्नानानि दानं पितृपिंडपातनं । होमोपवासादितपोनिषेवनं ॥ संक्रांतिसोमग्रहणादिकाः क्रियाः । न कल्पते लौकिकतीर्थसंगमे ॥ १९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गोपूजनं चंद्रदशाप्रदानं । लाभाय लंबोदरपूजनं च ॥ षष्ठ्यर्चनं मातृनिवेशनानि । जिने प-
रे वाऽप्युपयाचितानि ॥ २० ॥ हाढ्यादिपूजा पितृपिंडपातः । शनैश्चरे तैलतिलप्रदानं ॥ मि-
थ्यात्विदेवीसुरवैद्यनाथ–पूजा रवींद्वोर्दिवसे तपांसि ॥ २१ ॥ श्राद्धस्थितिर्भूतशरावकार्पणं ।
षाण्मासिकी वार्षिकी ह्यग्निकारिका ॥ पूजाविभूषापरिधानवासरे । यो रुक्मिणीरंगिणिसोनि-
णीकृते ॥ २२ कुदृष्टिवर्गे पदपातभाषणं । बुधाष्टमीपूजनमुत्तरायणं ॥ जलांजलिर्वारिघटा-
दिगोचर–प्रपाप्रदानं शिवरात्रिजागरः ॥ २३ ॥ रेवंतमार्गाधिपपूजनानि । मिथ्यादृशां सद्म-
नि लाभदानि ॥ माघे निशिस्नानघृतादिदानं । कन्याधनं पादपरोपणानि ॥ २४ ॥

मिथ्यात्वधर्मश्रुतिरिंद्रजाल–प्रेक्षा कुमारीजनभोजनादिकं ॥ पुत्रीपतेर्दर्शदिने च भो-
जनं । धर्माय कूपादिसरःसुखाननं ॥ २५ ॥ अनेकधा लोकगतेष्वनादिषु । स्थानेषु मि-
थ्यात्वमयेषु भूपते ॥ अब्धेर्जलानां चुलुकोपमान्यथ । प्रोक्तानि वर्ज्याणि तथा पराण्यपि ॥
॥ २६ ॥ अभ्रैर्विमुक्तो दिनकृन्निशेश–स्त्यक्तो मलौघैर्मुकुटो मणिश्च ॥ विभाति यद्वद् द्युति-
जालमाली । सम्यक्त्वमैभी रहितं तथैव ॥ २७ ॥ अस्मिन् हृदंतः स्फुरति त्रिलोक्यां । त-

॥ ४३ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्नास्ति यन्नोदयमेति सौख्यं ॥ अस्यैव सम्यक्त्वगुणस्य योगा–ज्जनाः शिवस्याश्रयिणो न्नवंति ॥ २८ ॥ आरोप्य यो निर्मलबोधिबीजं । हृत्क्षेत्रन्नूम्यां सुविवेकतोयैः ॥ वृद्धिं नयेत् प्राज्यरमाविलास–सौन्नाग्यनैरोग्यफलं स भुंक्ते ॥ २९ ॥ बद्धायुषः स्युः कुगतौ न पूर्वं । तदास्य लब्ध्या सुगतिं प्रयांति ॥ चिंतामणौ चुंबति पाणिपीठं । किं क्वापि दारिद्र्यदशा समेति ॥ ॥ ३० ॥ वातैर्यथा तृप्यति नागवर्गः । पयोन्नरैर्जीवति जीवलोकः ॥ सुधान्नरैर्हृष्यति देवलोको । धर्मं तथा पुष्यति बोधिबीजं ॥ ३१ ॥ सम्यक्त्वमित्थं बहुधा स्वरूप–मन्नाणि धर्मद्रुमबीजन्नूतं ॥ द्विधाथ धर्मं यतिगेहिन्नेदाद् । वंर्ण्यमानं शृणु न्नूप सम्यक् ॥ ३२ ॥

स संयमः सप्तदशप्रकारः । क्षांत्यादिन्नेदैर्बहुधा प्रपाल्यः ॥ यस्मान्न तीव्रं भुवि किंचिदन्य–द्यस्मान्न सारं पुनरत्र किंचित् ॥३३॥ नामुं विना ज्ञानमुपैति केवलं । केवली स्यादलमस्य वर्णने ॥ आशक्रमाचक्रिणमाशिवं यः । फलानि दत्ते विधिसेवनेन ॥ ३४ ॥ धर्मे द्वितीये गृहिणां च राजन् । पाल्या सदा द्वादशधा व्रताली ॥ समर्पितद्वादशदेवलोका । तमस्ततिध्वंसनसूर्यकल्पा ॥ ३५ ॥ स्थूलेषु जीवेषु विनाशन्नावः । संकल्पमुख्यस्त्रिविधोऽपि हेयः ॥ सं-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सारनिस्तारकरस्वरूपो । व्रतेषु भूपोपमम् एष धर्मः ॥ ३६ ॥ दारिद्र्यदौर्भाग्यकुणित्वपंगु—कु-
ष्ठित्वतिर्यङ्नरकादिभावैः ॥ दुःखान्यनेकानि भवंति हिंसा—संभूतपापप्रचयेन पुंसां ॥ ३७ ॥
न हंति योऽन्यान् स परैर्न हन्यते । दुनोति नाऽन्यान् स परैर्न दूयते ॥ अतः स्वतंत्रं सुख-
भावमिच्छता । कार्या न हिंसा मनसापि धीमता ॥ ३८ ॥ सुभूमभूमीपतिजामदग्न्य—श्री-
ब्रह्मदत्तप्रमुखा नरेशाः ॥ निस्त्रिंशहिंसावशवासनातो । द्वी सप्तमं ते नरकं प्रयाताः ॥ ३९ ॥
पारापते मेघरथो नरेशो । दयापरः कीर्त्तिमवाप विश्वे ॥ क्रमेण तीर्थंकरशांतिनाथ—भावेन
भूत्वा प्रययौ शिवं सः ॥ ४० ॥ पूजायशःश्रीसुखसंगतानि । पुण्यप्रतिष्ठाविभुताहितानि ॥
भवंति सत्येन तथा प्रशांता । रिपूरगव्याघ्रजलानलाः स्युः ॥ ४१ ॥ सौहार्दविश्वासविनाश-
वैर—संतापपापक्षयदुर्गतीनां ॥ स्थानं तथा मूकजडत्वनिंदा—प्रदं निदानं विपदामलीकं ॥ ४२ ॥
अलीकवाक्योद्भवपापपंक—संभारसंपूरितकाययष्टिः ॥ अधः पपात प्रथिताऽपकीर्त्ति—र्वसुः क्षि-
तीशः सह सप्तवंश्यैः ॥ ४२ ॥ गौभूमिकन्यापरकूटसाक्ष्य—न्यासापहारप्रमुखाणि राजन् ॥
स्थूलान्यलीकानि कथंचनापि । द्वेषेण रागेण वदेन्न विद्वान् ॥ ४३ ॥ पीडा न दुःखं न प-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रापवादो । न चापकीर्त्तिर्न दरिद्रता न ॥ नैर्वावहेला न कलंकपंको । भवेन्नरस्य त्यजतोऽ-
न्यवस्तु ॥ ४४ ॥ समृद्धिसिद्धिस्थिरबुद्धिशुद्धयः । कीर्त्तिद्युतिप्रोन्नतिशर्मसंगमः ॥ स्वर्गापवर्गा-
दिसुखानि पुंसां । भवंत्यदत्तस्वपराङ्मुखानां ॥ ४५ ॥ कौटिल्यकोट्या परवंचनाभि-र्गृह्णा-
ति योऽन्यस्य धनानि लोभात् ॥ भवांतरेऽर्थैर्बहुधापि वंच्यः । स दत्तसंकेत इवाऽपनीत्या ॥
॥ ४६ ॥ न विस्मृतं नो पतितं पथि स्थितं । गृह्णीयमन्यस्य धनं हि लोभात् ॥ लोकोभयनिं-
दानृपदंडयोग्यं । व्रते तृतीयेऽन्यधनं न लेयं ॥ ४७ ॥ शीलं कुलं संयमसाधुवादौ । लज्जाद-
यासत्यमतिश्रुतानि ॥ विषोपमानैर्विषयाभिलाषै-र्व्यालुप्तचित्ता जनता न वेत्ति ॥ ४८ ॥ ग-
र्भे निवासं जननं विनाशं । चिंतावहेलातनुनिग्रहादीन् ॥ सकाम आत्मा लभतेऽतिभूयो ।
निष्कामजंतुः सततं सुखी स्यात् ॥ ४९ ॥ विश्वासहानिर्बहुपापखानि-रनर्थयोनिः कुगतेर्नि-
दानं ॥ कलंकहेतुः कुयशोनिवास-स्त्याज्यः परस्त्रीविषयाभिलाषः ॥ ५० ॥

पुन्नागवर्या भुवि ये परेषां । नारीं च वारीमिव संत्यजंति ॥ नैवं लभंते वधबंधनानि ।
सुदर्शनश्रेष्ठिवदाप्तपूज्याः ॥ ५१ ॥ या काम्यते कामनटैर्विटव्रजै-र्यस्या मनो नैव गुणेषु र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्यते ॥ वेश्यां विवेकस्थितिकीर्तिमानिन । आहारमुच्छिष्टमिव त्यजंति ॥ ५२ ॥ ब्रह्मव्रत-
स्य प्रतिपालनेन । प्रज्ञावन्नाजः सुरराजसेव्याः ॥ पावित्र्यपात्रं पुरुषा न्नवंति । श्रीनारदर्षि-
प्रमुखाः शिवार्हाः ॥ ५३ ॥ न दारुन्निर्वह्निरपांनिधिर्जलै-र्हादारजालैरुदरं करैर्नृपः ॥ द्विजस्तु
दानैर्गगनं समीरणै-र्न तृप्तिपात्रं मनुजस्तथा धनैः ॥ ५४ ॥ गृहं सुहृत् पुत्रकलत्रवर्गो । धा-
न्यं धनं मे व्यवसायलान्नो ॥ कुर्वाण इत्थं न हि वेत्ति मूढो । विमुच्य सर्वं व्रजतीह जंतुः ॥
॥ ५५ ॥ परिग्रहं संतनुते यथा यथा । तथा तथा मोहन्नरेण पीड्यते ॥ हा हारयित्वा नर-
जन्म मोहतः । संजायतेऽनादिनिगोदजंतुषु ॥ ५६ ॥ मोहव्यतीतस्य नरस्य यत्सुखं । न त-
त्सुखं केशवशक्रचक्रिणां ॥ कृतांगरागस्य हि शद्यन्नाजिनो । न तत्सुखं यन्नृतशल्यके जने
॥५७॥ बाहुबली श्रीन्नरतो नरेशः । श्रीवासुदेवप्रतिवासुदेवौ. ॥ श्रीकोणिकश्रेणिकन्नूमिना-
थौ । जातौ विसंवादपदं हि लोन्नात् ॥ ५८ ॥ धनेषु धान्येषु हलेषु वस्तुषु । स्वर्णेषु रूप्य-
द्विचतुःपदेषु ॥ कुप्येषु मोहान्नवधा परिग्रह-स्तस्य प्रमाणं विदधीत धीनिधिः ॥ ५९ ॥ वि-
दिक्षु दिक्षूर्ध्वमधोगतेर्यत् । सीमाप्रमाणं क्रियते विधिज्ञैः ॥ लोन्नांबुधेः सेतुसमं विशिष्टं ।

P.P. Ac. Gunratnasuri M.S.                                                                Jun Gun Aaradhak Trust

षष्ठं भवेद्दिग्विरतिव्रतं तत् ॥ ६० ॥ कुर्वंति संख्यां भविकाश्च भोगो–पभोगयोर्यत्र विचित्र-
रूपां ॥ तत्सप्तमं पापनिवृत्तिहेतु । भोगोपभोगव्रतमाहुरार्याः ॥ ६१ ॥ पक्वान्नपुष्पादिकमेक-
वारं । यद्भुज्यते प्राणिभिरेष भोगः ॥ स्त्रीवस्त्रखट्वादिरनेकशो यः । संभुज्यतेऽसावुपभोग-
योगः ॥ ६२ ॥ अस्मिन् व्रते यद् बहुपापमूलं । तुच्छं फलं कंदमनंतकायं ॥ तद्वर्जनीयं विर-
तिंप्रपन्नैः । श्रीधर्मपीयूषरसे रसज्ञैः ॥ ६३ ॥ अंगारकर्मादिकमुग्रपाप–संपादकं पंचदशप्र-
कारं ॥ प्रचंडदुःखप्रदमंगभाजा । त्याज्यं महारंभकरं कुकर्म ॥ ६४ ॥ अनर्थदंडाद्विरतिं भजं-
त–स्त्यजंत्यपध्यानमिहार्त्तरौद्रं ॥ पापोपदेशं बहुहिंस्रदानं । नित्यं प्रमादाचरणं प्रबुद्धाः ॥
॥ ६५ ॥ सावद्यकर्मप्रतिषेधनेन । मनोहरध्यानविधानशीलैः ॥ अंतर्मुहूर्त्तं प्रतिपाद्यते यत् ।
सामायिकाख्यं नवमं व्रतं तत् ॥ ६६ ॥ ध्वांतं दिनेशोऽरिगणं जिगीषु–र्यतिः प्रमादं कुनयं
विवेकी ॥ हंति क्षणेनैव तथा कुकर्म–जालं करालं समता हिनस्ति ॥ ६७ ॥ यद्दिग्व्रतात्तं ग-
मनप्रमाणं । संक्षिप्यते प्रत्यहमेव धन्यैः ॥ व्रतानि यद्वा सकलानि देशा–वगासिकाख्यं द-
शमं व्रतं तत् ॥ ६८ ॥ तपश्चतुर्थ्यादि विधाय धन्य–मन्या नराः पर्वसु यच्चतुर्षु ॥ व्यापार-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्नारं सकलं सपापं । शरीरसत्कारमपि त्यजंतः ॥ ६९ ॥ ब्रह्मव्रतं तीव्रतरं दधानाः । प्रमाद-हानेन यते समानाः ॥ गृह्णंति यत्पौषधमेकचित्ता । एकादशं तद्व्रतमामनंति ॥ ७० ॥ यन्न-कपानासनवस्त्रपात्र--न्नैषज्यशय्यावसतिप्रदानं ॥ मुदाऽतिथिन्योऽतिथिसंविन्नागं । प्राहुर्व्रतं द्वादशमेतदार्याः ॥ ७१ ॥ शत्रौ च मित्रे च समस्वन्नावं । ज्ञानादिरत्नत्रयसाधकं यत् ॥ त-दत्र पात्रं प्रवदंति विज्ञा--स्तस्मै प्रदत्तं शिवशर्मदायि ॥ ७२ ॥ पात्रं प्रदाता शुन्नवस्तुलान्नो । न्नवेन्निवेण्या यदि संगमस्तत् ॥ श्रीचंदनाश्रीधनसार्थवाह--श्रीशालिन्नद्रोपमयेष्टसिद्धिः ॥७३॥ इत्थं नृप द्वादशधा व्रतानि । सम्यक्त्वमूलानि निवेदितानि ॥ दानादिन्नेदेन चतुःप्रकारं । वि-शेषधर्मं शृणु विश्वसारं ॥ ७४ ॥ अन्नीतिदानं शुन्नपात्रदानं । कृपाख्यदानोचितकीर्तिदानं ॥ आद्यद्वयान्मुक्तिरथ त्रयेण । न्नवांतरे स्याद्बहुन्नोग आत्मा ॥ ७५ ॥ विचित्रकर्मक्षयहेतुन्नूतं । श्रीशासनस्योन्नतिदानरूपं ॥ सर्वेषु दानेषु नृपायमानं । श्रीज्ञानदानं रचयंति धन्याः ॥७६॥ शीलव्यपायान्नरके निवासं । लेन्ने चिरं सत्यकिराईतोऽपि ॥ आबालकालादपि शीलसारो । जंबूकुमारोऽजनि मोक्षगामी ॥ ७७ ॥ वह्निस्तोयति पुष्पदामति फणी क्रीडाह्रदत्यंबुधिः ।



P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

शार्दूलो मृगति द्विपो वृषभति द्वेषी महामित्रति ॥ खड्गाद्यायुधपद्धतिः कुसुमति क्ष्वेडं च पीयूषति । प्रायः शीलगुणात्ततो रचयत श्रीशीललीलां जनाः ॥ ७८ ॥

हत्यादिदुष्टोदयकर्मकारी । लेभे शिवं साधुदृढप्रहारी ॥ सौभाग्यगेहं वसुदेव आर्यो । जज्ञे यतस्तत्र तपो जगर्ज ॥ ७९ ॥ कर्मेंधनध्वंसनपावकाभं । दत्तेंद्रचक्रेशपदादिलाभं ॥ पंचेंद्रियोन्मत्तगजांकुशाभं । तपः सुरद्रूपममाश्रयध्वं ॥ ८० ॥ विना तपस्यां चरणेन वर्जितो । नप्राप्तपूर्वो नियमादियंत्रणां ॥ मृगो दिवं श्रीभरतश्च केवलं । प्राप्तौ च हेतुः खलु तत्र भावना ॥ ८१ ॥ द्रुमः फलानां जननी सुताना-मभ्रं ग्रहाणां त्रिदिवं सुराणां ॥ उत्पत्तिभूमिश्च यथा तथैव । धर्मस्य भावो गदितो जिनेंद्रैः ॥ ८२ ॥ इत्थं सुधासारगिरा गुरुभ्यो । निशम्य धर्मं नृपतिर्जहर्ष ॥ दारिद्र्यमुद्रापरिखिन्नचेता । लब्ध्वा निधिं को मुदितो न वा स्यात् ॥८३॥ सम्यक्त्वमूलं गृहिणः स धर्म-मादाय भूपः सपरिच्छदोऽपि ॥ प्रणम्य सूरिं स्वगृहे समागा-त्तदीयविख्यातगुणैर्हृतात्मा ॥ ८४ ॥ धर्मोपकारं नृपपौरवर्गे । विधाय सूरिर्विजहार तस्मात् ॥ यत्तादृशा मेघसमाः परोप-काराय सर्वत्र कृतप्रचाराः ॥ ८५ ॥ अथ नृपनरवर्मा

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्राप्य धर्मं जिनोक्तं । जिनवरभवनानि प्रीतितोऽभ्रंलिहानि ॥ निजकसुकृतकीर्त्तिस्तंभशोभा-
वहानि । व्यरचयदुरुरोचिर्व्याप्तदिग्मंडलानि ॥ ८६ ॥ सपदि जिनवराणां तत्र संस्थाप्य मूर्त्ती
-र्विकचकुसुमजातैर्हृद्यनैवेद्यदानैः ॥ सुरभिमृगमदाद्यैः सारकर्पूरपूरै-रगुरुतगुरुभोगैः पूज-
यामास शश्वत् ॥ ८७ ॥

सुगुरुचरणभक्त्या शुद्धसिद्धांतसार-श्रवणसदुपकारैः संघपूजाविधानैः ॥ प्रतिदिनमथ भू-
मौ जंतुहत्यानिषेधैः । सुकृतमुपचिनोति द्रव्यदानैरमानैः ॥८८॥ अवगतनवतत्त्वो रक्षिताशेषस-
त्त्वो । गरिमविमलचित्तो नीतिरीतिप्रतीतः ॥ दलितकुमतजालः पुण्यकेलीविशालः । स ज-
यति नरवर्मा भूमिपालः कृपालुः ॥ ८९ ॥ तस्मिन्नरेशे जिनधर्मसेवां । प्रकुर्वति प्रत्यहमा-
दरेण ॥ लोकोऽपि जज्ञे जिनधर्मसेवी । राजा यथा तद्वदिह प्रजापि ॥९०॥ अथान्यदा सं-
सदि देववृंदै-र्युतः सुरेंद्रोऽवधिना धरित्रीं ॥ विलोकयन् श्रीनरवर्मभूपं । ददर्श सम्यक्त्वगु-
णैकतानं ॥ ९१ ॥ प्रवर्द्धमानप्रमदप्रकर्ष-प्रपूरितांतःकरणः स ऊचे ॥ भो भोः सुराः श्रीनर-
वर्मभूपः। सम्यक्त्वशाली सततं नमस्यः ॥ ९२ ॥ वेलां समुद्रः स्थिरतां सुमेरुः । सतो स्व-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शीलं शरन्नः स्वशौर्यं ॥ यद्वन्न मुंचत्यसुरैः सुरैर्वा । सम्यक्त्वतोऽसौ न तथात्र चाल्यः ॥
॥ ९३ ॥ तदेष धन्यः सुकृती कृती वा । स्वजन्मसाफल्यमनेन चक्रे ॥ स्वपूर्वजाना-
 मपि भूपतीनां । चकार पावित्र्यमसौ गुणौघैः ॥ ९४ ॥ श्रुत्वेति केचित्त्रिदशा जहर्षु-र्मध्य-
स्थभावं दधिरे परे च ॥ सेर्ष्या अभूवन्नपरे च केचि-त्त्रैविध्यमित्थं भुवने यदस्ति ॥ ९५ ॥
सुवेगनामा त्रिदशोऽथ दध्यौ । बाला अधीशाः खलु मद्यपाभाः ॥ यथेष्टमेवं गिरमुल्लपंतो ।
भीतिं ह्रियं नो गणयंत्यकीर्त्तेः ॥ ९६ ॥ अचिंत्यशक्तिप्रभुताभिभाजा-मग्रे सुराणां मनुजः
कियान् सः ॥ जाज्वल्यमानस्य पुरो महाग्नेः । किं क्वापि दृष्टा मदनस्य शक्तिः ॥ ९७ ॥
अनात्मनीनो मनसीति कृत्वा । तच्चालनाय त्रिदशः स वेगात् ॥ साधुव्रजोऽसेवितसू-
रिरूपं । निर्माय भूपस्य सदोंतरागात् ॥ ९८ ॥ समुत्थितः श्रीनरवर्मभूपति-र्विलोक्य सूरिं
सहसा समागतं ॥ बालोऽपि बाल्योचितविक्रमक्रमै-रभ्यागतं कं पितरं न धावति ॥ ९९ ॥ 
दत्तासने ब्रह्मगुरुं निविष्टं । प्रदक्षिणीकृत्य ननाम भूपः ॥ संयोज्य हस्तौ विनयेन नम्रः । प-
प्रच्छ भक्त्यागमकारणं च ॥ १०० ॥ ब्रह्मी स ऊचे नृपते मुनीनां । स्त्रैणे तृणे लोष्टगणे म-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णौ वा ॥ मोक्षे भवे मित्ररिपौ समानां । न क्वापि कार्यं भुवने समस्ति ॥ १ ॥ सत्यं प्रभो
किंतु परोऽपि कार्यं । विना समेति न सभां नृपस्य ॥ विशेषतो यूयमिहागता य-त्तत्स्वा-
॥ ५३ ॥ र्थमत्रादिशत प्रसद्य ॥ २ ॥ अत्रांतरे खड्गकरेण साधुना । केनापि भूपश्छुरिकोग्रमूर्त्तिना ॥
केनापि केनापि च भल्लिभाजिना । केशेषु कंठे जगृहेऽथ हस्तयोः ॥ ३ ॥ रे भ्रष्ट दुष्ट स्फु-
टपापपुष्ट । नित्यं निकृष्टं कृतशिष्टमार्ग ॥ हतोऽसि नष्टोऽसि मृतोऽसि सद्यो । निर्भर्त्सित-
स्तैर्नृपतिस्तदेत्थं ॥ ४ ॥ दुष्टैरनिष्टैर्वचनैस्तदीयै-र्न क्षोभलेशं भजतिस्म भूपः ॥ किं पातिता-
ऽङ्गुममंफलीकै-र्जहाति मेरुः स्थिरतां कदापि ॥ ५ ॥ अल्पस्मितप्रोल्लसितौष्ठयामलः । स्फु-
टीभवद्दंतसितांशुजालकैः ॥ कुर्वन् सभां तां सकलां समुज्ज्वलां । बभाण भूपो यतिरूप-
मोहितः ॥ ६ ॥ शीतांशुतः पावकपातसन्निभं । पयोदवृंदाद्विषवर्षणोपमं ॥ युष्मादृशानां
शमशीलशालिनां । कुचेष्टितं हा भगवन्निदं किमु ॥ ७ ॥ कूटप्रकोपारुणनेत्रपत्रा । वदंति ॥ ५३ ॥
ते रे कुनृपाधम त्वं ॥ जानासि किं भो निजचेष्टितानि । दत्से यदस्मान्प्रति दूषणानि ॥८॥
आकृष्टमुच्चैस्त्रुटति स्फुटत्यलं । भृतं घनं चर्वितमेव नीरसं ॥ इति स्थितिस्ते न वयं महा-

 रुषः। किं दर्दुरस्यापि विषं न धावति ॥ ए ॥ कृत्वा प्रसादं वदतैकवारं । पराजवः को वि-
दधे मया वः ॥ गुणागुणौ यन्मुकुरे मुखश्री-रिवावगम्यौ नियतं परेण ॥ १० ॥ 
 इत्युक्तवंतं नृपमूचिरे ते । हहं न जानासि निजापराधं ॥ यत्तारका पश्यति दूरतोऽर्थं ।
न स्वोपकंठस्थितमंजनं च ॥ ११ ॥ सीदंत्यमी साधुगणा गुणज्ञा-श्चतुर्विधाहारमनाप्नुवं-
तः ॥ मत्सीव नीरेण विवर्जितेयं । तनुः कथं तिष्ठति तं विना यत् ॥ १२ ॥ त्वं धार्मिकंम-
न्य इलातले स्फुटं । प्रकाशयन् श्रावकवादमात्मनि ॥ गृहीतनित्यातिथिदानसद्व्रतो । हा हा
निविष्टो गलके महात्मनां ॥ १३ ॥ सिद्धांतपाठं धृतसच्चरित्रं । क्रियाकलापा अपि जंतुरक्षां
॥ वयं विवेकं विनयादिकं च । कर्त्तुं क्षुधाक्षामतया न शक्ताः ॥ १४ ॥ तत्सर्वदैनैर्गतसर्वस-
त्वै-रपास्तलब्धैः क्षुधयातिदीनैः ॥ अस्माभिरेवं विदधेऽधुना य-द्बुभुक्षितैः किं क्रियते न पा-
पं ॥ १५ ॥ इत्थं यतिव्रातकृतापमान-संजातपापप्रचयस्य नूनं ॥ आलोचनार्थं हननं तवद-
मिहैव दुःकर्मफलं यतः स्यात् ॥ १६ ॥ तेषां मुखादश्रुतपूर्वमेवं । श्रुत्वा वचः स्वं नृपतिर्नि-
निंद ॥ विज्ञाय संतो निजदूषणानि । लज्जापराः स्युर्बहुदुःखभाजः ॥ १७ ॥ धिग्मां जानिं 

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धिग्मम पौरुषं धिग् । धिग् राज्यलक्ष्मीं पठितं च धिग्मे ॥ भवादृशानां मुनिपुंगवानां । नि-
र्हेतुवैरी यदहं बभूव ॥ १८ ॥ सत्यं सदोषोऽस्मि परं प्रभूणा—महं रहः शिक्षणयोग्य एव ॥
दुष्टांगजस्यापि पिता हिताय । ददाति शिक्षां गृहकोणकांतः ॥ १९ ॥ पवैंदुरोचिर्निचयाव-
दाते । मा भूत्कलंको जिनशासनेऽस्मिन् ॥ मैवं विजानातु जनः समस्त । ईदृक्कुकार्या मु-
नयो भवंति ॥ २० ॥

लोकापवादोदयभीतचित्ताः । सुकीर्त्तिधर्माचरणेऽप्यशक्ताः ॥ कृतापराधेऽपि जने न संतो-
। हृद्वाक्यकायैश्च विसंवदंति ॥ २१ ॥ अज्ञानतो यत्क्रियतेऽप्यकार्यं । लोकद्वये दुःखकरं भ-
वेत्तत् ॥ विचार्य कार्ये विहिते मुनीशा । भवंति वश्या भविनां सुरेशाः ॥ २२ ॥ युक्ता म-
मेयं भवदीयशिक्षा । निःशेषपापप्रशमाय दक्षा ॥ परं मुनीनामपवादनादो । भावी स गा-
ढं हृदि मां दुनोति ॥ २३ ॥ तेजस्विनः स्वं तृणवत्त्यजंति । न तत्र दोषः कुलधर्म एषः ॥
षट्कायरक्षाविधितत्पराणा—मिदं न युक्तं भवतां कुकर्म ॥ २४ ॥ मेघं मयूराः शरदं सित-
च्छदा—श्चंद्रं चकोरा द्रविणं दरिद्रिणः ॥ शूरा रणं प्राप्य भजंति संमदं । यथैव तद्वन्मुनयः प-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रीषहान् ॥ २५ ॥ नद्यः पयोधिं नयिनं गुणौघा। धर्मं विवेकी विनयी च विद्यां ॥ यथानुगच्छंति तथा सहर्षाः। श्रियो विचारप्रवणं पुमांसं ॥ २६ ॥ गोपालबालेष्वबलागणेषु । नित्यं स्थितं चापलचेष्टितं यत् ॥ कथं गुणज्ञेषु भवत्सु साधू-त्तमेषु सौम्येषु समागतं तत् ॥२७॥ शुभाशुभे सौख्यमसौख्यमुच्चैः । करोति नूनं विधिरंगभाजां ॥ निमित्तभूतं परमंतराले । करोति दातृ कुयशो यशो वा ॥ २८ ॥ सहंति कष्टानि तपांसि कुर्वते । यतिव्रजाः संयमजीविनो हि ॥ स्वप्राणसंदेहपदेऽपि साधवो । न कर्म कुर्वंत्यसमंजसं पुनः ॥ २९ ॥

कांतारकारागृहपर्वतांत-जलाऽनलस्त्रीनृपसंकटेऽपि ॥ असारमेतद्धि वपुस्त्यजंति । स्वाचारनाशं न समाचरंति ॥ ३० ॥ गर्भे निवासो जननं जरा च। कुयोनिपातो नियमस्य भंगात् ॥ संसारभीता अत एव धीराः। आजन्म घोरं व्रतमाचरंति ॥ ३१ ॥ वरं फणींद्रस्य मुखे करार्पणं । वरं प्रवेशो ज्वलिताग्निकुंडके ॥ शस्त्रेण पाशेन वरं मृतिः सतां। तथापि दुष्टाचरणं न सुंदरं ॥ ३२ ॥ येषां कुले यद्विहितं न केनचिद् । योग्यं न कर्त्तुं तदलाभदायि ॥ विधातुमन्यस्तदकार्यमुद्यत । आचंद्रसूर्यं स्वकुलं कलंकयेत् ॥ ३३ ॥ भक्तेन किं वा भवतां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुरः प्रज्ञो । शंखस्य शुक्लीकरणं किमौचितिः ॥ जानीत यूयं स्वयमेव संगतं । दहत्यवश्यं गुरुलंघिनी क्रिया ॥ ३४ ॥ त एव धन्या यशसां निकेतनं । तैरेव रत्नप्रसवा वसुंधरा ॥ बलेन वीर्येण धिया ह्रिया श्रिया । कुर्वंति ये श्रीजिनशासनोन्नतिं ॥ ३५ ॥ अहं त्वधन्यः कुलपांशुकल्पः । पापस्वरूपः कुयशोंधकूपः ॥ जज्ञे यतः श्रीजिनशासनेऽस्मिन् । लघुत्वहेतुर्यतिहीलनेन ॥३६॥ गतार्थसार्थस्य वरं विदेशो । भ्रष्टप्रतिज्ञस्य वरं विनाशः॥ कुबुद्धिसंगाद्वरमेकता हि । वरं दरिद्रीबहुपापवित्तात् ॥ ३७ ॥ कोपस्य संगाद्वरमग्निसेवनं । मानान्निषंगाद्वरमद्रिलंघनं ॥ सद्मबुद्धेर्वरमल्पबुद्धिता । गर्तान्निपातो वरमुग्रलोन्नतः ॥ ३८ ॥ गेही वरं नैव कुशीललिंगी । मूर्खो वरं मा विबुधः प्रमादी ॥ अंधो वरं मा परवित्तदृष्टि–र्मूर्खो वरं मा बहुकूटभाषी ॥ ३९ ॥

वरं च दास्यं विहितान्यमार्गणाद् । वरं च शस्त्री न परस्त्रियां गमः ॥ वरं विषं मा गुरुदेववंचनं । वरं विनाशो न कलंकिजीवितं ॥ ४० ॥ भो भो मुनींद्राः कुरुत स्ववांछितं । न वै विलंबं सहते हिताशयः ॥ संप्राप्य शत्रूं न चिरायते जयी । स्थातुं न युक्तं श्रुतदूषण-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्य मे ॥ ४१ ॥ गुरुर्नृपोऽध्यापकतातमातरो । युक्तां न शिक्षां ददते निजे यदि ॥ कः कस्य वक्ता हि हिताऽहितं त–दुःखाब्धिमध्ये जनता पतत्वहो ॥ ४२ ॥ देवे गुरौ धर्मविधावभक्तो । यस्तस्य शिक्षा क्रियते ह्यवश्यं ॥ न तत्र दोषो न जनापवादो । न धर्महानिर्न भयं परेन्यः ॥ ४३ ॥ इत्युक्तवंतं नृपतिं स्वनिंदा–परंपरां निश्चलतां दधानं ॥ सम्यक्त्वमार्गेऽवधिना विलोक्य । जहर्ष देवो विगतापकर्षः ॥ ४४ ॥ विहाय मायां विबुधः प्रबुद्धो । ऊलज्ज्वलत्कुंमलमंडितांगं । भानुप्रनं संसदि दत्ततोषं । दिव्यं वपुः स्वं प्रकटीचकार ॥ ४५ ॥ पंचप्रकारैः कुसुमैः स देव–स्ततान वृष्टिं नृपमस्तकेऽथ ॥ पूजास्तुतिश्रीसुभगत्वकीर्त्ती–र्धर्मे दृढत्वाल्लभते न को वा ॥ ४६ ॥ संयोज्य नाले करयामिलं स्वं । भक्त्या सुरः श्रीनरवर्मनेतुः ॥ सविस्मयं सभ्यजनं समग्रं । कुर्वंस्तदैवं विदधे प्रशंसां ॥ ४७ ॥ धन्योऽसि धन्योऽसि धराधिनाथ । वर्ण्योऽसि वर्ण्योऽसि सुबोधिबीजः ॥ पूज्योऽसि पूज्योऽसि जिनेशभक्त्या । नम्योऽसि नम्योऽसि सुरैरचाढ्यः ॥ ४८ ॥ गृहे गृहे संति सुता अनेके । मोहप्रमादव्यसनावलीढाः ॥ सत्त्वैकवर्यं धृतधर्मधैर्यं । त्वामेव पुत्रं जननी प्रसूता ॥ ४९ ॥ कुलेन मानेन नरेंद्र



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संपदा । विवेकपोषेण नयेन वैज्ञवैः ॥ दानेन पुण्येन यशश्चयेन । स्थैर्येण धैर्येण तवाद्य ग-
॥ ५ए ॥ र्जितं ॥ ५० ॥ चिंतामणिः कामगवी सुरडुः । श्रीः कामकुंज्जो निधयो नवापि ॥ अमी य-
था वस्तुषु मुख्यजूताः । सम्यक्त्वशुद्ध्या हि तथा त्वमत्र ॥ ५१ ॥ वर्ण्यः स यो नोऽधमक-
र्मकारी । स संयमी यः स्मरवीरवारी ॥ शूरः स यः कर्मरिपुप्रहारी । शुचिः स यो नाऽ-
न्यधनापहारी ॥ ५२ ॥ दानी स यः स्वल्पधनोऽपि दत्ते । मानी स यो दैन्यवचो न वक्ति
॥ गुणी स यः सर्वजने हितार्थी । सा स्त्री च या शीलगुणप्रसक्ता ॥ ५३ ॥ देवः स यो
रागविकारशून्यो । गुरुः स यः सक्रियबोधधन्यः ॥ स नीरदो यः समयानुवर्षी । स कृत्रियो
यः समरे प्रकर्षी ॥ ५४ ॥ धर्मी स यो धर्मरतो नितांतं । साधुः स वै यस्य मनः प्रशांतं ॥
तज्जन्म यत्सर्वजनोपकारि । तज्जीवितं यच्च कलंकमुक्तं ॥ ५५ ॥

इत्थं नराधीश सुरैश्चाव्यं । सम्यक्त्वमत्र प्रतिज्ञाति यस्य ॥ जैने मते सत्वहिते स ए- ॥ ५ए ॥
व । धन्यः प्रशस्यो भुवनैकधीरः ॥ ५६ ॥ अतो धरानाथ ममापराधं । नानाविधं सर्वममुं
सहस्व ॥ आघृष्यमाणा अपि शीतलत्वं । न धार्मिकाश्चंदनवत्त्यजंति ॥ ५७ ॥ बिडौजसा सं-

सदि वर्णितं ते । सम्यक्त्वधैर्यं धरणीधवाद्य ॥ एतन्निशम्याहमतीवदूनो । यथा हि घूकस्तरणिं नीरीक्ष्य ॥ ५८ ॥ अतः परीक्षाविधये विधिज्ञ । मयेंद्रजालं सकलं विचक्रे ॥ त्वं मेरुवन्निश्चलचित्तवृत्तिः । शक्रोपदिष्टाधिकसत्त्वशाली ॥ ५९ ॥ सम्यक्त्वतत्वे दृढबद्धबुद्धे । श्रीजैनधर्मार्जनलब्धशुद्धे ॥ आस्वर्गविस्तारियशोऽभिराम । जीयाश्चिरं श्रीनरवर्मराजन् ॥ ६० ॥ ऐरावणेनेव सुरेंद्रसेना । कल्पद्रुमेणेव सुमेरुभूमिः ॥ श्रीकौस्तुभेनेव मुकुंदवक्षः । पंचाननेनेव गुहा विभाति ॥ ६१ ॥ इदं तथा श्रीनरवर्मराजन् । त्वयाऽनिशं धर्मवशंवदेन ॥ प्रभावनानिर्मितिकर्मठेन । विभासते जैनमतं समस्तं ॥ ६२ ॥ युग्मं ॥ इत्थं स्तुवंतं सुरमाह भूपो । देव स्तुतिं मा वद मामकीनां ॥ क्व वर्त्तते श्रीजिनशासनाब्धि–स्तथा क्व चाहं जलमत्स्यकल्पः ॥ ६३ ॥ हीनस्य पुंसः स्तवनं विधातुं । युक्तं न ते देव विचक्षणस्य ॥ क्वाहं नृकीटः क्व च ते प्रशंसा । सम्यक्त्वशुद्धिर्मम काऽल्पबुद्धेः ॥ ६४ ॥

श्रुत्वेति देवो द्विगुणप्रमोद–मुत्तार्य मौलेर्मुकुटं सुभक्त्या ॥ मुहुर्मुहुस्तं प्रणिपत्य भूपं । वेगादसौ धाम निजं जगाम ॥ ६५ ॥ श्रीसमक्त्वस्थिरत्वप्रमुदितहृदयान्निर्जरात्स्वीयकीर्त्तिं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रुत्वा प्रोद्भूतलज्जान्नरविनतगिरा भूपतिः प्राह सभ्यान् ॥ जीयाच्छ्रीमज्जिनानां भवजलधित-
टं शासनं सर्वसारं । शक्रः संजातहर्षो निजसदसि गतो यत्प्रशंसां करोति ॥ ६६ ॥ सम्य-
क्त्वगेहिव्रतपालनानि । नानाविधाभिग्रहपालनानि ॥ श्रीशासनस्योन्नतिकारकाणि । कुर्व-
न्नृपोऽसौ समयं निनाय ॥ ६७ ॥ श्रीसम्यक्त्वगुणस्थिरः प्रसृमरश्राद्धव्रतप्रोद्धुरः । षोढावश्य-
कदानशीलसुतपःसद्भावनाभासुरः ॥ नित्यं सारपरोपकारविधुरः कारुण्यबद्धादरः । कृत्वांतेऽ-
नशनं नृपः समभवत्सौधर्मकल्पे सुरः ॥ ६८ ॥ दिव्यानि तत्रानुभवन् सुखानि । कुर्वंस्तथा
शाश्वततीर्थयात्राः ॥ शृण्वन् गिरस्तीर्थकृतां दधौ स । सम्यक्त्वरत्नं हृदये सदैव ॥ ६९ ॥ स-
र्वायुरेष प्रतिपाल्य तत्र । च्युतस्ततः क्षेत्रविदेहमध्ये ॥ भूत्वा नरेशः प्रतिपद्य दीक्षां । त-
स्मिन् भवे सिद्धिपदं स गंता ॥ ७० ॥ इत्थं श्रीनरवर्मभूपचरितं सम्यक्त्वमूलं मुदा । श्रुत्वा
ये जिनधर्मनिश्चलधियो देवैरचाल्यप्रभाः ॥ सम्यक्त्वं प्रतिपालयंति सततं ते जैनर्द्धीं श्रियं । 
लब्ध्वा श्रीकुशलोद्भवां शिवसुखश्रेयोवराः स्युर्नराः ॥ ७१ ॥ श्रीस्तंभनेशप्रभुपार्श्वनाथ–प्र-
सादतः स्तंभनतीर्थसंस्थः । चक्रे कथां बोधिकृतेऽहमेतां । शोध्या सदा ज्ञैर्मयि सुप्रसन्नैः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ७२ ॥ संवत्सरे सूर्यसमुद्रचंद्र–मिते सिते कार्त्तिकपूर्णिमाह्नि ॥ कृता कथा नंदतु पुष्पदंतौ । यावद्दिकाशं गगने विधत्तः ॥ ७३ ॥ इति श्रीनरवर्मचरित्रं समाप्तं ॥ श्रीरस्तु ॥ आ ग्रंथ श्रीजामनगरनिवासि पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे छापी प्रसिद्ध कर्यो छे. ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥





P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ इति श्रीनरवर्मचरित्रं समाप्तं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust